GL SANS 891.22
KAL
125601
LBSNAA

लो राष्ट्रीय प्रशासन अकादमी
L.B.S. National Academy of Administration
मसूरी
MUSSOORIE
पुस्तकालय
LIBRARY

अवाप्ति संख्या
Accession No. 125601 / 4542
वर्ग संख्या
Class No. GL Sans 891.22
पुस्तक संख्या
Book No. KAL कालिदा

॥ श्रीः ॥

कविकुलचक्रवर्तिश्रीकालिदासविरचितः

ऋतुसंहारः।

सुप्रसिद्धमहामहिमपण्डितवरमणिराम-
कृतया संस्कृतटीकया समलङ्कृतः।

लघुसिद्धान्तकौमुदी, पञ्चतन्त्रं, हितोपदेशः,
निर्णयसिन्धुः, अष्टाध्यायी, रत्नावली, षडङ्गं,
भगवद्गीता, योगवासिष्ठसारं, हनुमन्नाटक-
मित्यादिविविधग्रन्थानुवादकेन मुरादाबा-
ददैशिकेन व्रजरत्नभट्टाचार्येण कृ-
तया कामिनीसमाख्यया भाषा-
व्याख्यया समन्वितः।

स च

श्रीकृष्णदासात्मज–गङ्गाविष्णुना
निज "लक्ष्मीवेङ्कटेश्वर" मुद्रणालये
संमुद्य प्रकाशितः।

संवत १९८७ शके १८५२

कल्याण–मुंबई.

SANS 89

[इस पुस्तकका रजिष्टरी सब हक़ सन १८६७ के ऍक्ट २५
के बमूजिब यन्त्राधिकारीने स्वाधीन रक्खा है.]

पण्डित व्रजरत्नभट्टाचार्यः

	नाम.			की.	रु.	आ.	ट.	म.	रु.	आ.
४६४	काव्यमंजरी छपके तयार है.	क	....	१	८		०	३		
४६५	गीतगोविन्द संस्कृतटीका और भाषाटीका	क		१	४		०	३		
४६६	माघकाव्य (शिशुपालवध) सटीक संपूर्ण	२		२	८		०	६		
४६७	,, ,, ९ सर्ग	२		१	८		०	४		
४६८	किरातार्जुनीयकाव्य सटीक*	नि		२	०		०	४		
४६९	भर्तृहरिशतकत्रयसंस्कृतटीका और भाषाटीका	क		१	२		०	२		
४७०	,, तथा रफ्	क	....	१	०		०	२		
४७१	वैराग्यशतक संस्कृतटीका और भाषाटीका.	क		०	६		०	१॥		
४७२	भोजप्रबंध भाषाटीका	क	....	१	४		०	२		
४७३	भोजप्रबन्धकेवलभाषा ग्लेजकागज	क	....	०	१२		०	१॥		
४७४	भोजप्रबंध मूलमात्र....	क	....	०	७		०	१		
४७५	रघुवंश मल्लीनाथकृत संजीवनी टीका और टिप्पणी सहित जिल्दबंद ग्लेज	२	....	१	८		०	४		
४७६	,, ,, तथा रफ	२	....	१	४		०	४		
४७७	रघुवंशसटीक बारीक अक्षर सादा	क	....	०	१२		०	२		
४७९	,, तथा जिल्दबंद	क	....	१	०		०	२		
४८०	रघुवंश सटीक १ सर्गसे ९ सर्गतक	क	....	०	९		०	१		
४८१	कुमारसंभव सटीक	२	....	१	४		०	३		
४८२	मूर्खशतक भाषाटीका	क	....	०	१		०	॥		
४८३	दशकुमारचरित्र सटीक*	नि	....	१	८		०	३		
४८४	गीतगोविन्दमूल	क	....	०	३		०	॥		
४८५	हितोपदेश भाषाटीका अतिउत्तम	क	....	१	४		०	३		
४८६	हितोपदेश मूल	२		०	८		०	१		
४८७	रामकृष्णविलोमकाव्य	क		०	४		०	॥		
४८८	कृष्णकर्णामृत	१		०	४		०	॥		
४८९	भामिनीविलास मूल	१		०	४		०	॥		
४९०	,, भाषाटीका	२		१	०		०	२		
४९१	मेघदूतकाव्यसटीक	नि		०	६		०	१		
४९२	मेघदूत सान्वय भाषाटीका	क		०	८		०	१		
४९३	रघुवंश भाषाटीका पदयोजना तात्पर्यार्थ और सरलार्थसहित....	२		३	८		०	७		

४९४	पद्यावलीअनेकमहानुभावोंके संग्रहीतश्लोक	१	०–८	०–१
४९५	कविरहस्यं सटिप्पणी कं०	गो	०–६	०–॥
४९६	कृष्णामृततरङ्गिका सटीक	गो	०–५	०–॥
४९७	चौरपञ्चाशिका टिप्पणीसहित	गो	०–२	०–॥
४९८	कलिविडम्बन मूल	गो	०–२	०–॥
४९९	कलिविडम्बन भाषाटीकासहित	१	०–४	०–॥
५००	सौन्दर्यलहरी सटिप्पण	गो	०–३	०–॥
५०१	कटाक्षशतक सटिप्पण	गो	०–३	०–॥
५०२	भावशतक सटिप्पण....	गो	०–३	०–॥
५०३	आर्याशतक सटिप्पण	गो	०–२	०–॥
५०४	कामाक्षीस्तुतिशतक सटिप्पण	गो	०–३	०–॥
५०५	अम्बाष्टक सटिप्पण....	गो	०–२	०–॥
५०६	प्रशस्तिकाशिका	गो	०–३	०–॥
५०७	भक्तिरत्नावली	१	०–४	०–॥
५०८	घटकर्परकाव्य भाषाटीका	क	०–२	०–॥
५०९	राक्षसकाव्यसंस्कृतटीकाऔरभाषाटीकासहित	२	०–२	०–॥
५१०	शृंगारतिलक भाषाटीका सहित	२	०–४	०–॥
५११	शृंगारादिनवरस निरूपण भाषाटीका–(शृंङ्गार का अतीव चमत्कारी ग्रन्थ)	२	०–६	०–१
५१२	मध्वविजय	नथु	०–१२	०–२
५१३	अश्वघाटी काव्य भा० टी०....	क	०–४	०–॥
५१४	राधाविनोद काव्य भाषाटीका	क	०–२	०–॥
५१५	प्रेमलतिका भाषाटीका	क	०–२	०–॥
५१६	पञ्चतंत्र भाषाटीका	क	२–०	०–४
५१७	अमरुशतक शंकराचार्यकृत	२	०–१०	०–१

पुस्तक मिलनेका ठिकाना–

गंगाविष्णु श्रीकृष्णदास

" लक्ष्मीवेङ्कटेश्वर " छापाखाना,

कल्याण–मुम्बई.

भूमिका।

रे रे जनाः शृणुत मद्वचनं समस्ताः,
स्वर्गे सुधास्ति सुलभा नतु सा भवद्भिः।
कुर्मस्तदत्रभवतामुपकारकारि,
काव्यामृतं पिबत तत्परमादरेण॥

प्रिय रसिकवर! आज एक अभिनव काव्योपहार लेकर श्रीमान्की सेवामें उपस्थित होते हैं, इसमें षट्ऋतुका वर्णन ऐसी सरस कवितामें किया गया है कि—जिसकी मधुरताको आकण्ठ पान करनेसेभी तृप्ति नहीं होती इस काव्यके प्रणेता वेही विश्वविख्यात महाकवि कालिदास हैं जिनका नाम अटकसे लेके कटक, बल्कि हिन्दुस्थानसे लेके इँग्लिस्तानपर्यन्त पठित समाजमें बड़े गौरवके साथ लिया जाता है। यद्यपि इनके समय और जातिका निर्णय करना बड़ी कठिन बात है, परन्तु सुनते हैं जिस पाठशालामें इन्होंने अध्ययन किया था उसकी विद्यमानताका प्रमाण मैथिल देशमें पाया जाता है, असम्भव नहीं कि—यह मैथिल ब्राह्मण हों? कदाचित् दूरदर्शी उक्त कविराजने सभी जातिके ब्राह्मणोंमें अपनी समान प्रतिष्ठा विस्तृत करनेके तईं अपना विशेष परिचय न दिया हो। इनके निर्म्माण किये जितने ग्रन्थ उपलब्ध हुए हैं प्रायः सभीका अधिक प्रचार है। इस कारण ऋतुसंहारका विशेष परिचय देनेकी कोई आवश्यकता विदित नहीं होती।

प्रथम वैक्रमीय संवत् १९४९ में हमने इस काव्यके भाषानुवाद बनानेकी इच्छा की थी, परन्तु अनेक कार्य रहनेके कारण इच्छाको पूर्ण न कर सके थे। समयका कुछ ऐसा स्वभाव है कि—तनिक २ देरमें प्राणीके मनका भाव बदलता रहता है। इस हेतु मनुष्यको किसी कार्यसे निराश हो उद्योग न छोड़ना चाहिये, यदि मनुष्यका जीवन नियत है तो इस संसारमें प्राणी सभी कार्य कर सक्ता है। सुतराम् आज फिर इस काव्यके भाषान्तर करने-

का सौभाग्य हस्तगत हुआ। इसमें श्लोकोंके तले विद्वद्वर श्रीमणिराम पण्डितकी प्रणयन की हुई संस्कृत टीकाभी सन्निवेशित करी गई है। ग्रन्थके अन्तमें कतिपय श्लोक संस्कृत टीकासे रहितभी हैं पण्डित मणिरामने उन्हें प्रक्षिप्त कहकर छोड दिया है। अस्तु।

हमें पूर्ण आशा है कि इस ग्रन्थके पाठसे पाठकगण प्रसन्न हो हमारे परिश्रमको सफल करेंगे।

हमारी ओरसे इस ग्रन्थके संपूर्ण अधिकार लक्ष्मीवेंकटेश्वर यन्त्रालयके स्वामी श्रीमान् सेठ गंगाविष्णु श्रीकृष्णदासजीको समर्पित हैं।

चिरपरिचित–

व्रजरत्नभट्टाचार्य्यः

ठि० पटुवरगंज,

मुरादाबाद N. W. P.

श्रीगणेशाय नमः ॥

अथ

टीकाद्वयोपेतं

ऋतुसंहारकाव्यम् ।

प्रथमः सर्गः ।

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसंचयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालोऽयमुपागतः प्रिये ॥ १ ॥

यः समस्तविदुषां शिरोमणिर्येन राजति सभा विपश्चिताम् ।
तं महीश्वरकृताभिवन्दनं नीलकण्ठपितरं नमाम्यहम् ॥
शृङ्गारैकप्रधानं यदृतुसंहारनामकम् ।
काव्यं तत्कालिदासीयं व्याख्यास्येऽहं यथामति ॥
अप्रचारतमोमग्ना कालिदासकृतिर्यतः ।
क्रियतेऽतश्चन्द्रिकेयं विबुधानन्ददायिनी ॥

सं०टी०—अथ तत्रभवान्कालिदासनामा कविश्चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थम् " आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् " इत्याशीराद्यन्यतमस्य मङ्गलत्वेन तदन्यतरद्वस्तुनिर्देशरूपं मङ्गलमाचरन्नादौ ग्रीष्मकालवर्णनरूपां कथां प्रियायै प्रस्तौति—प्रचण्डेति ॥ प्रचण्ड उग्रः सूर्यो दिवाकरो यस्मिन्स तथोक्तः । स्पृहणीयो वाञ्छनीयश्चन्द्रमाश्चन्द्रो यस्मिन्स तथोक्तः । " हिमांशुश्चन्द्रमाश्चन्द्रः " इत्यमरः । सदा निरन्तरमवगाहेन निमज्जनपूर्वकस्नानैः क्षतः क्षीणो वारिसंचयो जलसमूहो यस्मिन्स तथोक्तः । दिनान्तः संध्याकालो रम्यो रमणीयो यस्मिन्स तथोक्तः ।

दिवसे सूर्यसत्वादौष्णजनितमाकुलत्वं चन्द्रोदयादिना च शीतलत्वात्तस्य रम्यत्वम् । अभि समन्तादुपशान्तो मन्मथः कंदर्पो यस्मिन्स तथोक्तः । " वसन्ते द्विगुणः कामः " इति वसन्तापगमे कामोपशान्तिः । अयं निदाघकालो ग्रीष्मकाल उपागतः संप्राप्तः । हे प्रिये ! वंशस्थवृत्तमेतत् । " जतौ तु वंशस्थमुदीरितं जरौ " इति लक्षणात् ॥ १ ॥

अर्थ–जिस समय सूर्य अति प्रचण्ड होता है, जिस समय चन्द्रमा अत्यन्त प्रीति करनेके योग्य हो जाता है, जब निरन्तर स्नान करनेसे प्रभूत जलभी शुष्क हो जाता है, हे प्रिये ! यह वही ग्रीष्मऋतुका समय आगया. इस समय सन्ध्या अत्यन्त रमणीय प्रतीत होती और कामदेव शान्त हो जाता है ॥ १ ॥

निशाः शशाङ्कक्षतनीलराजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरम् ।
मणिप्रकाराः सरसं च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥ २ ॥

सं०टी०–निशा इति ॥ हे प्रिये ! क्वचिच्छशाङ्केन चन्द्रमसा कर्त्रा क्षता दूरीकृता नीलराजयस्तमःपंक्तयो यासां तास्तथोक्ता निशा रात्रयः । " निशा निशीथिनी रात्रिः " इत्यमरः । क्वचिद्विचित्रं जलयन्त्रेण युक्तं मन्दिरं गृहम् । क्वचिन्मणिप्रकारा मणिविशेषाश्चन्द्रकान्तादयः । क्वचित्सरसं सान्द्रं चन्दनं च शुचौ ग्रीष्मकाले जनस्य लोकस्य सेव्यतामुपभोगविषयतां यान्तीति वचनविपरिणामेनान्वयः ॥ २ ॥

अर्थ–प्यारी ! ग्रीष्मऋतुमें चन्द्रमाकी शीतल किरणोंरूप वारिधारासे युक्त रात्री, कहीं कहीं जलयन्त्र अर्थात् फुहारोंसे सुन्दर मन्दिर (घर), [चन्द्रकान्त आदि] अनेक प्रकारकी मणियें, गीला किया हुआ अर्थात् घिसा हुआ चन्दन (यह सब वस्तुएँ) (कामी) मनुष्योंको सुखदायी हो जाती हैं ॥ २ ॥

सुवासितं हर्म्यतलं मनोहरं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥ ३ ॥

सं०टी०-सुवासितमिति ॥ कामिनो विलासिनः शुचौ ग्रीष्मकाले निशीथेऽर्धरात्रे । " अर्धरात्रनिशीथौ द्वौ " इत्यमरः । सुवासितं सुगन्धजलसेकादिना सुगन्धीकृतं मनोहरं सुन्दरं हर्म्यतलं प्रासादतलम् । प्रियामुखस्य कान्तावदनस्योच्छ्वासेन विकम्पितं मधु । मदनस्य कंदर्पस्य दीपनमुद्दीपकं सुतन्त्रिणा गीतं गानं च । " गीतं गानमिमे समे " इत्यमरः । अनुभवन्त्यास्वादयन्तीत्यर्थः । एतेनापि ग्रीष्मकालस्य कामिनां मनोहरत्वमुक्तम् ॥ ३ ॥

अर्थ-ग्रीष्मऋतुमें अर्द्धरात्रीके समय कामी पुरुष सुगन्धियोंसे परिपूरित सुहावनी अटारियोंको, प्यारीकी मुखपवनसे उद्गीर्ण होनेवाले मधुको और कामदेवको चैतन्य करनेवाले सुन्दर २ गीत और वाद्योंको अनुभव (उपभोग) किया करते हैं ॥ ३ ॥

नितम्बबिम्बैः सदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनाम् ॥ ४ ॥

सं०टी०-नितम्बेति ॥ स्त्रियो विलासिन्यो दुकूलानि वस्त्राणि मेखला रसनाश्च ताभिः सहितानि तैस्तथोक्तैर्नितम्बबिम्बैः कटिपश्चाद्भागैः । " पश्चान्नितम्बः स्त्रीकट्याः " इत्यमरः । हारा आभरणानि च तैः सहितास्तैस्तथोक्तैः सचन्दनैश्चन्दनालिप्तैः स्तनैः । स्नाने स्नानकाले यः कषायो लापितसुगन्धिद्रव्यस्तेन वासिताः संजातवासास्तैस्तथोक्तैः शिरोरुहैः केशैः कामिनां निदाघमुष्मार्णं शमयन्ति दूरीकुर्वन्तीत्यर्थः ॥ ४ ॥

अर्थ–स्त्रियें अपने कामियोंकी गर्मीको झीने वस्त्र और मेखला-युक्त अपने पुष्ट नितम्बोंसे अथच स्नानके समय लगाई हुई सुगन्धियोंसे महकते हुए केशोंसे, एवम् हार धारण किये तथा चन्दन-युक्त स्तनोंसे शान्त करती हैं ॥ ४ ॥

नितान्तलाक्षारसरागरञ्जितै-
र्नितम्बिनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभि-
र्जनस्य चित्तं क्रियते समन्मथम् ॥ ५ ॥

सं०टी०–नितान्तेति ॥ नितान्तमत्यन्तं लाक्षारसस्य रागेण रञ्जितास्तैस्तथोक्तैः सनूपुरैर्मञ्जीरसहितैः । "मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः । पदे पदे प्रतिपदं हंसरुतं मरालशब्दमनुकुर्वन्ति तैस्तथोक्तैर्नितम्बिनीनां चरणैर्जनस्य लोकस्य चित्तमन्तःकरणं समन्मथं मदनसहितम् । "मदनो मन्मथो मारः" इत्यमरः । क्रियते विधीयत इत्यर्थः ॥ ५ ॥

अर्थ–सुन्दर कटितटवाली अबलायें चरणोंको सुन्दर महावरसे लाल बनाके नूपुर धारण कर जब चलती हैं, तब बिलकुल हंसोंकी समान शब्द होता है, उनके पग २ पर कामीपुरुषोंको कामदेवका उत्पन्न करनेवाला कौतुक उत्पन्न होता है ॥ ५ ॥

पयोधराश्चन्दनपङ्कचर्चिता-
स्तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः
प्रकुर्वते कस्य मनो न सोत्सुकम् ॥ ६ ॥

सं०टी०–पयोधरा इति ॥ चन्दनस्य पङ्केन द्रवेण चर्चिताः लिप्ताः । तुषारवद्गौराः शुभ्रवर्णा अर्पिता हारशेखराः श्रेष्ठहारा येषु ते तथोक्ताः पयोधराः स्तनाः । सहेममेखलाः सुवर्णरसनासहिताः । "स्त्राकट्यां मेखला काञ्ची सप्तकी रसना तथा।" इत्यमरः। नित-

म्बदेशाः श्रोणीबन्धाश्च कस्य मनः सोत्सुकं सोत्कण्ठं न प्रकुर्वते प्रकर्षेण न कुर्वन्ति । अपि तु सर्वस्यापिकुर्वन्तीत्यर्थः ॥ ६ ॥

अर्थ–घने चन्दनके लेपसे अत्यन्त शीतल पयोधर और तुषार (बरफ) की समान स्वच्छ हारावलीसे अलंकृत हुए स्तनोंके अग्रभाग, और सुवर्णकी कर्धनीसे शोभायमान नितम्बदेश [यह सब सुन्दरताकी सामग्री] किसके मनको (कामदेवकी ओर) उत्कण्ठित नहीं करते, अर्थात् उपरोक्त कामसाधनकी सामग्रीको देखके सबके चित्त स्त्रियोंमें प्रीति करने लगते हैं ॥ ६ ॥

समुद्गतस्वेदचिताङ्गसंधयो
विमुच्य वासांसि गुरूणि सांप्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ति प्रमदाः सयौवनाः ॥ ७ ॥

सं–टी०–समुद्गतेति ॥ समुद्गतो निर्गतो यः स्वेदो घर्मस्तेन चिता व्याप्ता अङ्गसंधयो बाहुमूलादयो यासां तास्तथोक्ताः । सयौवनास्तारुण्यसहिता उन्नतस्तना उच्चकुचाः प्रमदाः स्त्रियः सांप्रतमिदानीं गुरूणि जडानि वासांसि वस्त्राणि विमुच्य दूरीकृत्य स्तनेषु कुचेषु तनु सूक्ष्ममंशुकं वासः कंचुक्यादि निवेशयन्ति स्थापयन्तीत्यर्थः ॥ ७ ॥

अर्थ–संप्रति (ग्रीष्मऋतुके समय) यौवनवती (युवती) स्त्रियोंने शरीरकी सन्धियोंमें प्रस्वेद आजानेके कारण बडे बडे वस्त्रोंको त्यागकर ऊंचे उरोजोंके ऊपर झीने वस्त्रोंको धारण किया लिया है॥७॥

सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिस्वनै-
र्विबोध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥

सं०टी०–सेति ॥ चन्दनाम्बुना चन्दनजलेन । चन्दनद्रवेणेति

यावत् । सहितं युक्तं यद्यजनं तदुद्भवास्तदुत्पन्ना येऽनिला वायवस्तैः । हारयष्ट्या कुसुममालया सहितानि युक्तानि यानि स्तनमण्डलानि कुचमण्डलानि तेषामर्पणैः । वल्लक्या वीणया सहिताश्च ते काकलिनः सूक्ष्मकलाश्च ते गीतनिस्वना गाननिनादाश्च तैः । "वीणा तु वल्लकी" इत्यमरः। "काकली तु कले सूक्ष्मे" इत्यमरः । अद्य मन्मथः कामः सुप्त इव निद्रित इव । राजेवेत्यर्थः । विबोध्यत उद्बुध्यते ॥ ८ ॥

अर्थ—आज चन्दनके जलसे तर किये हुए वीजनेकी पवनसे, हार धारण किये हुए छैरे अंगवाली अबलाओंके गोलमटोल अथवा सुन्दर स्तनोंका स्पर्श करनेसे और वीणाके साजके ऊपर मधुर स्वरका गान सुननेसे मानो सचमुचही कामदेव जागा उठता है॥८॥

सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नूनं भृशमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥ ९ ॥

सं०टी०—सितेष्विति ॥ चन्द्रमा निशासु रात्रिषु सितेषु धवलेषु हर्म्येषु प्रासादेषु योषितां स्त्रीणां सुखेन प्रसुप्तानि निद्रितानि मुखानि वदनानि चिरं चिरकालं विलोक्यावलोक्य भृशमत्यन्तमुत्सुक उत्कण्ठितः सन्निशाक्षये रात्रिक्षये ह्रियेव लज्जयेव पाण्डुतां पाण्डुरतां याति गच्छति । नूनमिति वितर्के ॥ ९ ॥

अर्थ—बोध होता है कि, धवल अटारियोंके ऊपर स्त्रियोंके सुखपूर्वक शयन करते हुए मुखको चन्द्रमा चिरकालपर्यन्त निरख परखकर उत्कण्ठा करता हुआ लज्जासे प्रभातसमय श्वेत हो जाता है ॥ ९ ॥

असह्यवातोद्धतरेणुमण्डला
प्रचण्डसूर्यातपतापिता मही ।

न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः ॥ १० ॥

सं०टी०-असह्येति ॥ प्रियावियोगः कान्ताविरहः स एवानलोऽग्निस्तेन दग्धं भस्मीभूतं मानसमन्तःकरणं येषां तैस्तथोक्तैः प्रवासिभिर्विदेशवासिभिरसह्यः सोढुमशक्यो यो वातो वायुस्तेनोद्धतमूर्ध्वक्षिप्तं रेणुमण्डलं यस्याः सा तथोक्ता । प्रचण्ड उग्रो यः सूर्यस्य तरणेरातप उष्णं तेन तापिता संतापिता मही पृथ्वी द्रष्टुमपि न शक्यते । गन्तुं न शक्यत इत्यत्र किं न वक्तव्यमित्यर्थः ॥ १० ॥

अर्थ-इस समय भूमीके ऊपर प्रबल वायुसे घनी धूलि उड रही है, और प्रचण्ड सूर्यकी घामसे अतिशय सन्तप्त हुई अवनीको जिनके मन प्यारीके वियोगाग्निसे भस्म होरहे हैं ऐसे परदेशी लोग देखतक नहीं सकते ॥ १० ॥

मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसंनिभं नभः ॥ ११ ॥

सं०टी०-मृगा इति ॥ भृशमत्यन्तं प्रचण्डस्तीक्ष्णतरो य आतप उष्णं तेन तापिताः संतापिताः । महत्या तृषा पिपासया परिशुष्काः संशुष्कास्तालवो येषां ते तथोक्ता मृगा हरिणा भिन्नेनाञ्जनेन सन्निभं तुल्यं नभ आकाशं निरीक्ष्य वीक्ष्य तोयं जलमिति शङ्कया वनान्तरेऽन्यद्वने प्रधाविता दुद्रुवुः ॥ ११ ॥

अर्थ-प्रचण्ड धूपमें मृग अत्यन्त सन्तप्त और अधिक तृषासे शुष्ककण्ठ होकर नीले आकाशमें जल समझकर वनके बीच इधर उधर दौडते फिरते हैं अर्थात् तृषाके सताये हुए मृग आकाशको सरोवर जान उसमें जलकी भ्रान्ति करके भागते हैं ॥ ११ ॥

सविभ्रमैः सस्मितजिह्मवीक्षितै-
र्विलासवत्यो मनसि प्रवासिनाम् ।
अनङ्गसंदीपनमाशु कुर्वते
यथा प्रदोषाः शशिचारुभूषणाः ॥ १२ ॥

सं०टी०—सविभ्रमैरिति ॥ यथा शशिचारुभूषणाः शश्येव चन्द्र एव चारु सुन्दरं भूषणं येषां ते तथोक्ताः प्रदोषाः संध्यासमयाः । प्रवासिनां मनस्यन्तःकरणेऽनङ्गसंदीपनं कामसंदीपनं कुर्वते । तथेत्यध्याहार्यम् । शशिचारुभूषणाः शशी चन्द्रस्तद्वच्चारूणि सुन्दराणि भूषणानि यासां तास्तथोक्ता विलासवत्यो विलासिन्यः सविभ्रमैर्विभ्रमसहितैः सस्मितानि सहास्यानि जिह्मानि कुटिलानि वीक्षितानि निरीक्षणानि तैः कृत्वा प्रवासिनां मनस्याशु झटित्यनङ्गसंदीपनं कामस्योद्दीपनं कुर्वत इत्यर्थः ॥ १२ ॥

अर्थ—विलास भरी कामिनियें विलास भरे मन्द मुसकानयुक्त तिरछी चितवनसे परदेशियोंके चित्तमें तत्कालही कामदेवको इस प्रकार चैतन्य कर देती हैं, जैसे चन्द्रमारूप सुन्दर आभूषणको धारण किये (अर्थात् चन्द्रमाकी चांदनीसे शोभायमान) सन्ध्या (पथिकोंके मनमें विलासभावकी उत्तेजना करती है) ॥ १२ ॥

रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः
फणी मयूरस्य तले निषीदति ॥ १३ ॥

सं०टी०—रवेरिति ॥ रवेः सूर्यस्य मयूखैः किरणैः । " किरणोंऽशुमयूखांशुगभस्तिघृणिरश्मयः " इत्यमरः । अभितापितः संतापितः । भृशमत्यन्तं पथि मार्गे तप्तपांसुभिरुष्णतेजोभिर्विदह्यमानः । अवाङ्मुखोऽधोमुखो जिह्मगतिः कुटिलगमनो मुहुर्वारंवारं श्वसञ्छ्वा-

सोच्छ्वासं कुर्वन्फणी सर्पो मयूरस्य बर्हिणः। "मयूरो बर्हिणो बर्हिः" इत्यमरः। तलेऽधोभागे निषीदत्यवतिष्ठत इत्यर्थः ॥ १३ ॥

अर्थ-सूर्यकी किरणोंसे सन्तप्त हुआ सर्प मार्गमें तत्ते वालूसे अत्यन्त भस्म (अधजला) होकर नीचेको मुखकर आडी तिर्च्छी गतीसे वार वार लम्बी २ श्वास लेता हुआ मयूरके तले (अर्थात् मोरकी छायामें) बैठके विश्राम लेता है ॥ १३ ॥

तृषा महत्या हतविक्रमोद्यमः
श्वसन्मुहुर्दूरविदारिताननः।
न हन्त्यदूरेऽपि गजान्मृगेश्वरो
विलोलजिह्वश्चलिताग्रकेसरः ॥ १४ ॥

सं०टी०-तृषेति ॥ महत्या तृषा पिपासया हतो विक्रमस्य पराक्रमस्योद्यम उद्योगो यस्य स तथोक्तः। मुहुर्वारंवारं दूराद्विदारितं विस्तारितमाननं मुखं येन स तथोक्तः। विलोलजिह्वश्चलिताश्चञ्चला अग्रकेसरा अग्रसटा यस्य स तथोक्तो मृगेश्वरः सिंहः। "सिंहो मृगेन्द्रः पञ्चास्यः" इत्यमरः। अदूरेऽपि। समीपे वर्तमानानिति शेषः। गजान्मातङ्गान्न हन्ति न मारयतीत्यर्थः। न हि जायते स्वस्मिन्क्लेशिते परहनने प्रवृत्तिरिति भावः ॥ १४ ॥

अर्थ-मृगराज सिंह अत्यन्त तृषाके मारे निर्बल और उद्यमहीन होकर मुखको अतीव फैलाये हुए वार २ लम्बी २ श्वासें ले रहा है, उसकी केशरका अग्रभाग उड रहा है और वह जीभ लपलपा रहा तथा निकट आये हुएभी हस्तीको मारनेके तईं नहीं उठता ॥१४॥

विशुष्ककण्ठास्तसीकराम्भसो
गभस्तिभिर्भानुमतोऽनुतापिताः।
प्रवृद्धतृष्णोपहता जलार्थिनो
न दन्तिनः केसरिणोऽपि बिभ्यति ॥ १५ ॥

सं०टी०—विशुष्केति ॥ विशुष्केण कण्ठेनाहतं गृहीतं सीकराम्भस्तुषारजलं यैस्ते तथोक्ताः। भानुमतः किरणमालिनः सूर्यस्य गभस्तिभी रश्मिभिरनुतापिताः संतापिताः । प्रवृद्धतृष्णयात्यधिकपिपासयोपहताः पीडिता अत एव जलार्थिनो जलाकांक्षिणो दन्तिनो गजाः केसरिणोऽपि सिंहादपि न बिभ्यति भयं न प्राप्नुवन्तीत्यर्थः १५

अर्थ—प्रखर किरणधारी सूर्यकी किरणोंसे सन्तप्त हुए अत एव शुष्क कण्ठवाले हाथी बूंदभरभी जल न पाकर विशेष प्याससे व्याकुल हुए जलकी इच्छा करके (विचरते हैं) और सिंहको देखकरभी भयभीत नहीं होते ॥ १५ ॥

हुताग्निकल्पैः सवितुर्गभस्तिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनं
कलापचक्रेषु निवेशिताननम् ॥ १६ ॥

सं०टी०—हुताग्निकल्पैरिति ॥ सवितुः सूर्यस्य हुताग्निकल्पैर्हुताश्यासावग्निश्च तत्कल्पैस्तत्सदृशैः । तद्वदत्यन्तप्रचण्डैरिति यावत् । गभस्तिभिरंशुभिः क्लान्तं म्लानं शरीरं वपुश्चेतश्च येषां ते तथोक्ताः कलापिनो मयूराः कलापचक्रेषु बर्हमण्डलेषु निवेशितं प्रवेशितमाननं मुखं येन तत्तथोक्तं समीपवर्तिनं भोगिनं सर्पं न घ्नन्ति न मारयन्तीत्यर्थः ॥ १६ ॥

अर्थ—आहुति देनेसे अत्यन्त प्रचण्ड हुए अग्निकी सदृश तीक्ष्ण सूर्यकी किरणोंसे मयूरोंके शरीर और चित्त अतीव व्याकुल हो गये हैं, अत एव वे मयूर अपनी पूंछकी छायामें फन रखके स्थित हुए एवं इसीहेतु अत्यन्त निकट प्राप्त हुएभी सर्पको नहीं मारते हैं ॥ १६ ॥

सभद्रमुस्तं परिशुष्ककर्दमं
सरः खनन्नायतपोतृमण्डलैः ।

रवेर्मयूखैरभितापितो भृशं
वराहयूथो विशतीव भूतलम् ॥ १७ ॥

सं०टी०—सभद्रेति ॥ भद्रमुस्तेन "भद्रमोथा" इति प्रसिद्धेन सहितं परिशुष्कः कर्दमः पङ्को यस्मिंस्तत्तथोक्तं सरः सरोवरमायतानि दीर्घाणि यानि पोतमण्डलानि तैः कृत्वा खनन् । रवेः सूर्यस्य मयूखैः किरणैर्भृशमत्यन्तमभितापितः संतापितो वराहयूथः शूकरसमूहः । "वराहः शूकरो घृष्टिः" इत्यमरः । भूतलं भूगर्भं विशतीव प्रविशतीवेत्युत्प्रेक्षा ॥ १७ ॥

अर्थ—शूकरोंका झुण्ड प्रचण्ड कांतिवाले सूर्यसे अतिशय सन्तप्त होकर अपने मुखके अग्रभागके द्वारा भद्र मोथेसे परिपूर्ण और जिनमेंकी कीचड बिलकुल सूख गई है ऐसे सरोवरोंको खनन करते हैं (इससे प्रतीत होता है कि) मानो भूमीमें प्रवेश कर-रहे हैं ॥ १७ ॥

विवस्वता तीक्ष्णतरांशुमालिना
सपङ्कतोयात्सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषीदति ॥ १८ ॥

सं०टी०—विवस्वतेति ॥ तीक्ष्णतरैः प्रचण्डतरैरंशुभिः किरणैर्मालते शोभते तथोक्तेन विवस्वता सूर्येणाभितापितो भेको मण्डूकः । "भेको मण्डूकवर्षाभू" इत्यमरः । पङ्कतोयेन कर्दमजलेन सहितं युक्तं तस्मात्तथोक्तात्सरसः सरोवरादुत्प्लुत्य तृषितस्य भोगिनः पन्नगस्य । "उरगः पन्नगो भोगी" इत्यमरः । फणैवातपत्रं छत्रं तस्य तलेऽधोभागे निषीदति तिष्ठतीत्यर्थः ॥ १८ ॥

अर्थ—अति प्रचण्ड किरणवाले सूर्यसे सन्तप्त हुए मैंडक कीचडयुक्त जलवाले सरोवरोंमेंसे कूद २ कर तृषासे सता हुएये सर्पकी फणरूप छत्रीके तले (छायाका आश्रय लेकर) बैठते हैं ॥ १८ ॥

समुद्धताशेषमृणालजालकं
विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडनसंहतैर्गजैः
कृतं सरः सान्द्रविमर्दकर्दमम् ॥ १९ ॥

सं०टी०—समुद्धृतेति ॥ समुद्धृतं निष्काशितमशेषं संपूर्णं मृणालजालकं बिससमूहो यस्मात्तत्तथोक्तं विपन्नमीनं समापन्नमीनं द्रुताः पलायिता भीताश्च ते सारसाश्च ते यस्मात्तथोक्तं सरः सरोवरं परस्परोत्पीडने संहतैः संलग्नैर्गजैः सान्द्रो निबिडो विमर्दः संग्रामः कर्दमः पङ्कश्च यस्मिंस्तत्तथा । यद्वा । सान्द्रो निबिडो विमर्देन संग्रामेण कर्दमः पङ्को यस्मिंस्तत्तथाभूतमित्यर्थः ॥ १९ ॥

अर्थ—परस्पर (एक दूसरेको) पीडा देनेके कारण एकत्रित हुए हाथी सरोवरोंमेंसे संपूर्ण मृणालोंको तोड डालते हैं, दुर्दशाग्रस्त मत्स्यसमुदायको विनाश करते हैं, भयसे भीत हुए सारसोंको भगाये देते हैं और सरोवरोंकी रहीसही कीचडकोभी खूंद २ कर सुखाये देते हैं ॥ १९ ॥

रविप्रभोद्भिन्नशिरोमणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः ॥ २० ॥

सं०टी०—रवीति ॥ रविप्रभया सूर्यकान्त्योद्भिन्ना निर्गताः शिरोमणेर्मूर्धन्यमणेः प्रभा कान्तिर्यस्य स तथोक्तः । विलोलेन चञ्चलेन जिह्वाद्वयेन लीढ आलीढो मारुतः पवनो येन स तथोक्तः । विषाग्निसूर्यातपतापितो विषं गरलमग्निर्दावानलः सूर्यातप उष्णं तैस्तापितोऽत एव तृषाकुलः फणी सर्पो मण्डूककुलं भेकसमूहं न हन्ति न मारयतीत्यर्थः ॥ २० ॥

अर्थ-सूर्यकी प्रभाके आभाससे जिसके शिरके मणीकी कांति झलकने लगी, जो लपलपाती हुई अपनी दो जिह्वाओंसे पवनको चाटता है ऐसा सर्प अपने विषकी ज्वाला और सूर्यकी धूपसे सन्तप्त होनेके कारण प्याससे आतुर होकर मैंडकोंकोभी नहीं मारता॥२०॥

सफेनलोलायतवक्त्रसंपुटं
विनिःसृतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निःसृतमद्रिगह्वरा-
दवेक्ष्यमाणं महिषीकुलं जलम् ॥ २१ ॥

सं०टी०-सफेनेति ॥ सफेनं लोलं चञ्चलमायतं दीर्घं वक्त्रसंपुटं मुखसंपुटं यस्य तत्तथोक्तम् । विनिःसृता निर्गता आसमन्ताल्लोहिता रक्ता जिह्वा यस्य तत्तथोक्तमुन्मुखमूर्ध्वमुखम् । तृषा पिपासयाकुलं व्याकुलमत एव जलं सलिलमवेक्ष्यमाणं निरीक्ष्यमाणं महिषीकुलमद्रिगह्वराद्रिरिगह्वरान्निःसृतं निर्गतामित्यर्थः । " अद्रिगोत्रगिरिश्रावा " इत्यमरः ॥ २१ ॥

अर्थ-महिषीगणोंके मुखसंपुट अर्थात् दोनों ओष्ठभाग लार और झागोंसे लिस रहे हैं, उसी सने हुए मुखमेंसे लाल २ जीभ कुछेक बाहरको निकल रही है, वे प्याससे व्याकुल होकर ऊपरको मुख उठाये जलको देखती हुई पर्वतोंकी कन्दराओंमेंसे बाहरको निकलती हैं ॥ २१ ॥

पटुतरदवदाहोच्छुष्कसस्यप्ररोहाः
परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापक्षीणतोयाः समन्ता-
द्विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः२२॥

सं०टी०-पटुतरेति ॥ पटुतरोऽतिसमर्थो यो दवो दावस्तस्य दाहोच्छुष्का दहनोच्छुष्काः सस्यप्ररोहाः सस्यांकुरा येषु ते त-

थोक्ताः । परुषो निष्ठुरो यः पवनो वायुस्तस्य वेगेनोत्क्षिप्तान्यूर्ध्वक्षिप्तानि संशुष्कानि पर्णानि पत्राणि येषु ते तथोक्ताः । समन्तादितस्ततो दिनकरस्य परितापेनातपेन क्षीणानि तोयानि येषु ते तथोक्ताः । उच्चैरुच्चप्रदेशतो वीक्ष्यमाणा अवलोक्यमाना वनान्ता अरण्यप्रान्ता भयं विदधतीत्यर्थः । मालिनीवृत्तमेतत् । तल्लक्षणं तु " ननमयययुतेयं मालिनी भोगिलोकैः " इति ॥ २२ ॥

अर्थ–वनमें तिनके प्रचण्डतासे भवकती हुए दावानलसे भस्म होते हैं, जितने शुष्क पत्ते हैं वे सब वायुके प्रबल वेगसे उडे जाते हैं, सूर्यके तापसे चारों ओरका जल बिलकुल शुष्क हो गया, अत एव वनके जिस प्रान्तको देखा जाय वोही अधिक भय दिखाता है २२

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छ-
ञ्छरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥ २३ ॥

सं०टी०–श्वसितीति ॥ शीर्णानि गलितानि पर्णानि पत्राणि यस्य स तादृशो यो द्रुमो वृक्षस्तत्र तिष्ठतीति स तथोक्तो विहगवर्गः पक्षिसमुदायः श्वसिति श्वासोच्छ्वासं करोति । क्लान्तं म्लानं कपिकुलं वानरसमूहोऽद्रेः पर्वतस्य निकुञ्जं लतागृहम् । " निकुञ्जकुञ्जौ वा क्लीबे " इत्यमरः । उपयाति गच्छतीत्यर्थः। गवया गोसदृशमृगविशेषास्तेषां यूथः समुदायस्तोयं जलमिच्छन्सर्वत इतस्ततो भ्रमति । अजिह्ममकुटिलं शरभानां कुलं शरभा अष्टपदपशुविशेषास्तेषां कुलं समुदायः कूपादम्बु जलं प्रोद्धरति गृह्णातीत्यर्थः ॥ २३ ॥

अर्थ–पतझाड हुए वृक्षके ऊपर बैठे हुए पक्षिगण लम्बी२श्वासें लेते हैं, वानरगण अतिशय दुःखी होकर लताओंसे घिरे हुए पर्वतोंके निकुंजोंमें जाते हैं, चमरगौएँ जल ढूंढती हुई वनमें चारों और

भागी फिरती है, विचारे सीधे साधे शरभ (अष्टपदी सिंहविशेष) कूपमेंसे जल निकालते हैं ॥ २३ ॥

विकचनवकुसुम्भस्वच्छसिन्दूरभासा
प्रबलपवनवेगोद्भूतवेगेन तूर्णम् ।
तटविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥ २४ ॥

सं०टी०–विकचेति ॥ विकचः प्रफुल्लो नवो नूतनः कुसुम्भस्तद्वत्स्वच्छो निर्मलो यः सिन्दूरस्तस्य भा इव भाः कान्तिर्यस्य तेन तथोक्तेन । प्रबलस्य पवनस्य वेगेनोद्भूतः संभूतो वेगो यस्य तेन तथोक्तेन । तटविटपानां तीरस्थवृक्षशाखानां लताग्राणां चालिङ्गनेन परिरम्भणेन व्याकुल आकुलस्तेन तथोक्तेन पावकेन वह्निना दिशि दिशि प्रतिदिशं तूर्णं सत्वरं भूमयः परिदग्धाः संदग्धा इत्यर्थः २४

अर्थ–नवीन खिले हुए कुसुम्भ (पुष्प) और निर्मल सिन्दूरकी सदृश आभावाली, तथा वृक्ष और लतादिकोंके अग्रभागका आलिंगन करनेके तईं व्याकुल हुई अग्नि प्रबल पवनके वेगसे औरभी तेज होकर तुरन्त मानो चारों ओरसे भूमीको भस्म करै डालती है ॥ २४ ॥

ज्वलति पवनवृद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥ २५ ॥

सं०टी०–ज्वलतीति ॥ पवनेन वायुना वृद्धो वृद्धिं प्राप्तो दवाग्निर्दावानलः । " दवदावौ वनानिलौ " इत्यमरः । पर्वतानां दरीषु कन्दरेषु ज्वलति । तथा शुष्का वंशा वेणवो यासु ताः स्थल्यः कृत्रिमभूमयस्तासु पटुनिनादैः स्फुटतरध्वनिभिः स्फुटति विकाश-

भावमाप्नोति । तथा क्षणेन क्षणादेव लब्धा प्राप्ता वृद्धिर्येन तथोक्तः संस्तृणमध्ये प्रसरति । तथा प्रान्तलग्नः सन्मृगवर्गं हरिणसमूहं ग्रसयति व्याकुलं करोतीत्यर्थः ॥ २५ ॥

अर्थ–समीप भागमें लगी हुई अग्नि (दावानल) पर्वतोंकी कन्दराओंमें पवनसे वृद्धिको प्राप्त होकर धक् २ शब्द करती है, सूखे हुए बांसोंके वनमें चट २ शब्द करके उनको भस्म करती है, तृणोंके क्षेत्रमें पहुँचकर छिनभरमें वृद्धिको प्राप्त होके चारों ओर फैल जाती है, अत एव मृगसमुदायको विध्वंस करती है ॥ २५ ॥

बहुतर इव जातः शाल्मलीनां वनेषु
स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखानुत्पतन्प्रांशुवृक्षा-
न्भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥ २६ ॥

सं०टी०–बहुतर इति ॥ अग्निः शाल्मलीनां वनेषु बहुतरः प्रचुररूपो जात इव स्फुरति । द्रुमाणां कोटरेषु शाखागह्वरेषु कनकगौरः काञ्चनगौरः स्फुरति । पवनेन वायुना धूतः कम्पितः सन्नत एव परिणताः परिपक्का दलानि पर्णानि शाखाश्च येषां तांस्तथोक्तान्प्रांशुवृक्षानुन्नतद्रुमानुत्पतन्सन् । सर्वतः समन्ततो वनान्ते भ्रमति भ्रमणं करोतीत्यर्थः ॥ २६ ॥

अर्थ–सेमलके वनमें अग्नि ढेरका ढेर होकर वृक्षोंके कोटरोंमें सुवर्णकी समान गौरवर्ण धारण कर प्रज्वलित होती है, सूखे वृक्षोंके ऊपर अत्यन्त वेगसे फैलकर पवनके वेगसे प्रचण्ड हो वनमें चारों ओर फैलती है ॥ २६ ॥

गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः
सुहृद इव समेता द्वन्द्वभावं विहाय ।
द्रुतवहपरिखेदादाशु निर्गत्य कक्षा-
द्विपुलपुलिनदेशां निम्नगां संविशन्ति ॥ २७ ॥

सं०टी०-गजेति ॥ वह्निना दावाग्निना संतप्ता देहाः शरीराणि येषां ते तथोक्ता अत एव द्वन्द्वभावं वैरभावं विहाय त्यक्त्वा सुहृदो मित्राणीव समेताः संगता गजगवयमृगेन्द्रा गजो हस्ती गवयो गोसदृशो मृगविशेषो मृगेन्द्रः सिंहश्च ते हुतवहस्य वह्नेः परिखेदात्संतापात्।यद्वा। हुतवहस्य परिखेदो यत्र तस्मात्तथोक्तात्। कक्षाद्विरिगह्वरादाशु झटिति निर्गत्य विपुलो महान् पुलिनदेशस्तीरप्रान्तो यस्यास्तां तथोक्तां निम्नगां नदीं संविशन्त्याश्रयन्त इत्यर्थः॥२७॥

अर्थ-हाथी गवय (गौकी समानमृग) और सिंह ये सब अग्निके सन्तापसे सन्तप्त हो अपने स्वाभाविक वैरभावको त्यागकर परस्पर मित्रोंकी समान एकसाथ अग्निसे सन्तप्त हुए वन अथवा कन्दरामेंसे तुरन्त निकलकर नदियोंके प्रभूत रेतीसंपन्न किनारोंका आश्रय लेते हैं ॥२७॥

कमलवनचिताम्बुः पाटलामोदरम्यः
सुखसलिलनिषेकः सेव्यचन्द्रांशुहारः।
व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥ २८ ॥

सं०टी०-कमलेति ॥ सुललितमतिरमणीयं गीतं गानं यस्यास्तस्याः संबोधनं हे सुललितगीते! कमलानां पङ्कजानां वनेन समुदायेन चितं व्याप्तमम्बु जलं यस्मिन्स तथोक्तः। पाटलानां पाटलकुसुमानामामोदो गन्धो रम्यो रमणीयो यस्मिन्स तथोक्तः। यद्वा पाटलामोदेन रम्यो रमणीय इति। सुखः सुखकरः सलिलस्य निषेकः स्नानं यस्मिन् स तथोक्तः। सेव्याः सेवितुं योग्याश्चन्द्रस्यांशवः किरणा हाराः कुसुममालाश्च यस्मिन्स तथोक्तः। कामिनीभिः समेतो युक्तो निदाघो निदाघकालो निशि रात्रौ हर्म्यपृष्ठे प्रासादतले सुखेन तव व्रजतु गच्छत्वित्यर्थः ॥ २८ ॥

इति भारद्वाजगोत्रोत्पन्नमणिरामविरचितया चन्द्रिकाख्यया व्याख्यया समेतः कविश्रीकालिदासकविवराग्रणीकृतावृतुसंहारे महाकाव्ये ग्रीष्मवर्णनं नाम प्रथमः सर्गः ॥१॥

अर्थ–सरोवरोंके जलमें कमल खिल गये, पाटल (गुलाब) के फूलकी सुगन्धी रमणीक लगती है, संप्रति डुबकी लगाके स्नान करना और चन्द्रमाकी किरणें येही केवल सुहावनी लगती हैं, आओ प्यारी ! इस समय ग्रीष्ममें सुन्दरी स्त्रियोंके साथ इस अटारीके ऊपर आजकी रात तुम्हारे गीत श्रवण करके बितावें ॥ २८ ॥

इति श्रीव्रजरत्नभट्टाचार्य्यकृतौ कामिनीसमाख्यायां भाषाव्याख्यायां ग्रीष्मवर्णनं नाम प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ।

ससीकराम्भोधरमत्तकुञ्जर-
स्तडित्पताकोऽशनिशब्दमर्दलः ।
समागतो राजवदुद्धतद्युति-
र्घनागमः कामिजनप्रियः प्रिये ॥ १ ॥

सं०टी०–अथ क्रमप्राप्तं वर्षाकालं वर्णयति–ससीकरेति ॥ हे प्रिये ! ससीकरः साम्बुकणो योऽम्भो धरो जलधरः स एव मत्तः प्रमत्तः कुञ्जरो गजो यस्य स तथोक्तः । पक्षे ससीकराम्भोधर इव मत्तः कुञ्जरो यस्येति । " सीकरोऽम्बुकणाः स्मृताः " इत्यमरः । तडिद्विद्युदेव पताका यस्ये स तथोक्तः । पक्षे ताडिदेव पताका यस्येति । " तडित्सौदामिनी विद्युत् " इत्यमरः । अशनिशब्द एव मर्दलः । पक्षे अशनिर्वज्र इव यः शब्दो निनादः स एव मर्दलो वाद्यविशेषो यस्य स तथोक्तः । उद्धतद्युतिरुत्कटकान्तिः कामिजनप्रियो घनागमो वर्षाकालो राजवत्समागत आगत इत्यर्थः। वंशस्थं वृत्तम् । लक्षणं तूक्तमेव ॥ १ ॥

अर्थ–प्राणप्रिये ! नन्ही २ बूंदोंकी बौछार सहित नवीन नीरद-

रूप उन्मत्त हाथियोंको संग लिये, चमकती चपलाकी पताका धारण करनेवाले वज्रके भयानक शब्दको वाद्यकी समान करनेवाला और कामियोंका प्यारा यह वर्षाकाल राजाओंकी समान उच्च शब्द करता हुआ आगया ॥ १ ॥

नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित्प्रभिन्नाञ्जनराशिसंनिभैः ।
क्वचित्सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥ २ ॥

सं०टी०—नितान्तेति ॥ क्वचिन्नितान्तमत्यन्तं नीलानि कृष्णानि यान्युत्पलानि कुवलयानि तेषां पत्राणां दलानां कान्तिरिव कान्तिर्येषां तैस्तथोक्तैः । क्वचित्कुत्रचिद्भागे प्रभिन्नो योऽञ्जनराशिः कज्जलसमूहस्तेन संनिभैः सदृशैः । क्वचित्सगर्भाणां गर्भवतीनां प्रमदानां स्त्रीणां ये स्तनाः कुचास्तेषां प्रभेव प्रभा कान्तिर्येषां तैस्तथोक्तैर्घनैर्मेघैर्व्योमाकाशं समन्तत इतस्ततः समाचितं व्याप्तमित्यर्थः ॥ २ ॥

अर्थ—अत्यन्त नीले कमलोंकी पखडियोंकी सदृश मनोहर कांतिवाले, जगह २ घनी अंजनराशिकी समान श्याम और ठौर २ गर्भवती स्त्रियोंके स्तनोंकी समान नीली आभावाले ऐसे बादलोंने मानो चारोंही ओरसे आकाशको आच्छादित कर रक्खा है ॥ २ ॥

तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं बहुधारवर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥

सं०टी०—तृषेति ॥ तृषा पिपासा तयाकुलैर्व्याकुलैश्चातकपक्षिणां कुलैः समुदायैः प्रयाचिताः प्रार्थितास्तोयभरेण जलभरेणावलम्बन्त

इति तथोक्ताः । वह्वचो धारा यस्यां क्रियायां यथा भवति तथा वर्षन्ति ते तथोक्ताः ।श्रोत्रस्य श्रवणस्य मनोहर आह्लादकरः स्वनः शब्दो येषां ते तथोक्ता बलाहका मेघाः । " अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः । " इत्यमरः । मन्दं प्रयान्ति गगने संचरंतीत्यर्थः ॥ ३ ॥

अर्थ–प्याससे नितरां व्याकुल हुए पपीहे तथा अनगिन्त अन्य पक्षियोंद्वारा (जलकी कामनासे) याचना करे हुए, जलके भारसे नीचेको लटकते हुए अत एव घना जल वर्षानेवाले बादल शनैःर भ्रमण करते हैं, एवं उनके गर्जनेका शब्द कानोंको अत्यन्त प्यारा लगता है ॥ ३ ॥

बलाहकाश्चाशनिशब्दमर्दलाः
सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकै-
स्तुदन्ति चेतः प्रसभं प्रवासिनाम् ॥ ४ ॥

सं०टी०–बलाहका इति ॥ अशनिशब्दमर्दला अशनिर्वज्रस्तस्य शब्द एव मर्दलो रणवाद्यविशेषो येषां ते तथोक्ताः । तडिद्विद्युदेव गुणो ज्या यस्य तत्तथोक्तम् ।"मौर्वी ज्या शिञ्जिनी गुणः " इत्यमरः । सुरेन्द्रचापमिन्द्रधनुः । " धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् । " इत्यमरः । दधतो धारयन्तो बलाहका मेघाश्च सुतीक्ष्णानां धाराणां जलधराणां पतनान्येवोग्रसायकास्तीक्ष्णबाणास्तैः कृत्वा प्रवासिनां प्रोषितानां चेतोऽन्तःकरणं प्रसभमत्यन्तं तुदन्ति व्यथयन्तीत्यर्थः ॥ ४ ॥

अर्थ–वज्रके शब्दको आभूषणकी समान धारण करनेवाले, बिजलीकी प्रत्यंचा चढे हुए सुरराज इन्द्रके धनुषको धारण करनेवाले बादल तीक्ष्ण धारारूप बाणोंकी वर्षा करके गड २ शब्दके द्वारा पथिकोंके चित्तको व्यथा देते हैं ॥ ४ ॥

प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः।
विभाति शुक्लेतररत्नभूषिता
वराङ्गनेव क्षितिरिन्द्रगोपकैः॥ ५॥

सं०टी०—प्रभिन्नेति॥ प्रभिन्नेन वैदूर्येण नीलमणिना निभाः सदृशास्तैस्तथोक्तैस्तृणांकुरैः प्रोत्थितकन्दलीदलैः प्रोत्थितानि निर्गतानि यानि कन्दलीनां दलानि पत्राणि तैः। "द्रोणपर्णी स्निग्धकन्दा कन्दली" इति शब्दार्णवः। इन्द्रगोपकैः कृमिविशेषैश्च समाचिता व्याप्ता क्षितिर्धरित्री। "धरा धरित्री धरणिः क्षोणी ज्या काश्यपी क्षितिः।" इत्यमरः। शुक्लेतरैः कृष्णादिवर्णै रत्नैर्मणिभिर्भूषिता शोभिता वराङ्गनेवोत्तमनायिकेव विभाति शोभत इत्यर्थः॥ ५॥

अर्थ—शानके ऊपर शुद्ध करी हुई वैदूर्यमणिकी समान चमकीले नवीन तृणांकुरोंसे तथा परिपुष्ट केलेके दलोंसे समन्वित हरे रंगकी मणियोंसे अलंकृत हुई सुन्दर युवतीकी समान यह भूमी वीरबहूटियोंसे सुशोभित होती है॥ ५॥

सदा मनोज्ञं स्वनदुत्सवोत्सुकं
विकीर्णविस्तीर्णकलापशोभितम्।
ससंभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम्॥ ६॥

सं०टी०—सदेति॥ सदा सर्वदा मनोज्ञं सुन्दरं स्वनच्छब्दायमानमुत्सवोत्सुकं हर्षणोत्कण्ठितम्। यद्वोत्सवे हर्षे उत्सुकमुत्कण्ठितम्। विकीर्णः प्रसारितो विस्तीर्णो लम्बमानो यः कलापो बर्हस्तेन शोभितम्। ससंभ्रमं ससंवेगं यदालिङ्गनं परिरम्भणं चुम्बनं च तत्राकुलं व्याकुलं बर्हिणां कलापिनां कुलं प्रवृत्तमारब्धं नृत्यं नर्तनं येन तत्तादृशमद्यास्तीत्यर्थः॥ ६॥

अर्थ–सदा बादलोंके मनोहर शब्द सुननेके लियें उत्कण्ठावाला, लम्बे २ केशपाशोंकी समान (अथवा लम्बी २ पुच्छसे) शोभायमान और कौतुकपूर्वक बार २ आलिंगन और चुम्बन करनेमें मनोयोगसे निरत ऐसा मयूरसमुदाय आज कल नृत्य करनेमें अत्यन्त प्रवृत्त हो रहा है ॥ ६ ॥

निपातयन्तः परितस्तटद्रुमान्
प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः सुदुष्टा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥ ७ ॥

सं०टी०–निपातयन्त इति ॥ प्रवृद्धो वेगः प्रवाह उत्साहो वा येषां तैस्तथोक्तैः । अनिर्मलैः कलुषैर्मलिनैर्वा सलिलैर्जलैर्लावण्यजलैर्वा । " सलिलं कमलं जलम् " इत्यमरः । परितः समन्ततस्तटद्रुमांस्तटप्ररूढवृक्षान्पितृमातृकुलजनाभिभावकान् वा निपातयन्त्यः समूलमुन्मूलयन्त्यो नाशयन्त्यो वा सुदुष्टाः स्त्रिय इव जात उत्पन्नो विभ्रमः भ्रूभ्रूक्षेपादिचेष्टाभेदो यासां तास्तथोक्ताः । जातविभ्रमाः समुत्पन्नभ्रमविशिष्टाः नद्यस्त्वरितं शीघ्रं पयोनिधिं समुद्रं प्रयान्ति गच्छन्तीत्यर्थः ॥ ७ ॥

अर्थ–अत्यन्त वेगसे बहनेवाले और मैले कुचैले जलसे किनारोंके ऊपर जमे हुए चारों ओरके वृक्षोंको उखाडती हुई नदियें समुद्रके प्रति इस प्रकार जाती हैं जैसे विलासवती कामिनियें कामदेवसे व्याकुल होकर (पतिके निकट) जाती हैं ॥ ७ ॥

तृणोत्करैरुद्गतकोमलाङ्कुरै-
र्विचित्रनीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं
विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥ ८ ॥

सं०टी०-तृणोत्करैरिति ॥ उद्गता निर्गताः कोमला अंकुरा येषां तैस्तथोक्तैः । विचित्रनीलैर्हरिणीमुखैः क्षताः खण्डितास्तैस्तथोक्तैः-स्तृणोत्करैरुद्गता निर्गता पल्लवाः किसलयानि येषां तैस्तथोक्तैः । " पल्लवोऽस्त्री किसलयम् " इत्यमरः । द्रुमैर्वृक्षैः कृत्वा विभूषितानि शोभितानि वैन्ध्यानि विन्ध्यसंबन्धीनि वनानि काननानि । "गहनं काननं वनम् " इत्यमरः । मानसमन्तःकरणं हरन्तीत्यर्थः ॥ ८ ॥

अर्थ-नवीन उत्पन्न होनेके कारण अत्यन्त कोमल अंकुरोंसे और हरिणियोंके मुखसे गिरे हुए नीले वर्णके घासके अंकुरोंसे एवं नवीन कोंपलसे युक्त वृक्षोंसे समलंकृत हुए मनको हरनेवाले यह वन मानो सचमुचही मनको हरे लेते हैं ॥ ८ ॥

विलोलनेत्रोत्पलशोभिताननै-
र्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता सैकतिनी वनस्थली
समुत्सुकत्वं प्रकरोति चेतसः ॥ ९ ॥

सं०टी०-विलोलेति ॥ विलोलानि चञ्चलानि यानि नेत्रोत्पलान्युत्पलसदृशानि नेत्राणि तैः शोभितानि भूषितान्याननानि वदनानि येषां तैस्तथोक्तैः । " वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् । " इत्यमरः । उपजातसाध्वसैः संजातभयैर्मृगैर्हरिणैः । " मृगे कुरङ्गवातायुहरिणाजिनयोनयः । " इत्यमरः । समन्तादितस्ततः समाचिता व्याप्ता सैकतिनी सिकतासंबन्धिनी वनस्थल्यकृत्रिमारण्यभूमिश्चेतसोऽन्तःकरणस्य समुत्सुकत्वमौत्सुक्यं प्रकरोति प्रकर्षेण जनयतीत्यर्थः ॥ ९ ॥

अर्थ-जिनके मुख चंचलनेत्ररूप कमलोंसे शोभाको प्राप्त हो रहे हैं, और चारों ओरसे जिनको घबडाहट उत्पन्न हो रहा है ऐसे मृगोंसे व्याप्त हुई और वालुकायुक्त किनारोंवाली यह वनस्थली चित्तको अतीव उत्कण्ठित करती है ॥ ९ ॥

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा
घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ १० ॥

सं०टी०—अभीक्ष्णमिति ॥ अभीक्ष्णं मुहुर्मुहुः । " मुहुर्मुहुः पुनः शश्वदभीक्ष्णमसकृत्समाः । " इत्यमरः । उच्चैरुच्चस्वरेण ध्वनता शब्दं कुर्वता पयोमुचा मेघेन घनान्धकारीकृतशर्वरीष्वप्यघनान्धकारा घनान्धकारा यथा संपद्यते तथा कृताश्च ताः शर्वर्यो रात्रयो यथा तथाभूतासु तडित्प्रभया विद्युत्कान्त्या दर्शिता मार्गभूमयो यासां तास्तथोक्ता अभिसारिकाः स्त्रियो रागात्कान्तानुरागेण । संकेतमिति शेषः । प्रयान्ति गच्छन्तीत्यर्थः ॥ १० ॥

अर्थ—अत्यन्त घनघोर और उच्च स्वरसे शब्द करनेवाले वर्षाती बादलोंके घने अन्धकारसे आच्छादित हुई रात्रियोंमेंभी अभिसारिका स्त्रियें बिजलीकी चमकसे मार्गकी भूमिको देख २ कर अनुरागसे जाती हैं ॥ १० ॥

पयोधरैर्भीमगभीरनिस्वनै-
स्तडिद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान्
परिष्वजन्ते शयने निरन्तरम् ॥ ११ ॥

सं०टी०—पयोधरैरिति ॥ भीमो भयानको गभीरो गम्भीरो निस्वनो निर्घोषो येषां तैस्तथोक्तैः । " स्वननिर्घोषनिर्ह्रादनादनिस्वा-

---

१ " कांतार्थिनी तु या याति संकेतं साभिसारिका । " अर्थात् जो स्त्री पतिके मिलनेकी कामनासे संकेतित स्थानको जाती है उस अभिसारिका कहते हैं ऐसा साहित्यदर्पणमें लिखा है ।

ननिस्वनाः।" इत्यमरः। पयोधरैर्मेघैस्तडिद्भिर्विद्युद्भिश्च भृशमत्यन्तमुद्वेजितमुद्विग्नं चेतोऽन्तःकरणं यासां तास्तथोक्ता योषितो नार्यः। "स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः।" इत्यमरः। कृतोऽपराधोऽन्यायः परवनितानिरीक्षणादिर्यैस्तांस्तथोक्तानपि प्रियाञ्छयने निरन्तरं निरवकाशं यथा भवति तथा परिष्वजन्त आलिङ्गन्त इत्यर्थः॥ ११॥

अर्थ–भयानक और गम्भीर निर्घोष करनेवाले गर्जते हुए बादलोंके गडगडाहटसे चित्तमें सहमी हुई स्त्रियें (परस्त्रीगमन आदि) अपराध करनेवालेभी अपने स्वामियोंको सोते समय अत्यन्त गाढ आलिंगन करती हैं॥ ११॥

विलोचनेन्दीवरवारिबिन्दुभि-
र्निषिक्तबिम्बाधरचारुपल्लवाः।
निरस्तमाल्याभरणानुलेपनाः
स्थिता निराशाः प्रमदा प्रवासिनाम्॥ १२॥

सं०टी०–विलोचनेति॥ विलोचनानि नेत्राणीन्दीवराणीव नीलोत्पलानीवेति विलोचनेन्दीवराणि तेषां ये वारिबिन्दवो जलबिन्दवस्तैः कृत्वा निषिक्ताः संसिक्ताः बिम्बाधरा बिम्बसदृशाधराश्चारुपल्लवा इवेति ते यासां तास्तथोक्ताः। बिम्बपदेनारक्तत्वं पल्लवपदेन च कोमलत्वं व्यज्यते। निरस्तानि त्यक्तानि माल्यान्याभरणानि भूषणान्यनुलेपनानि चन्दनादीनि याभिस्तास्तथोक्ताः प्रवासिनां प्रोषितानां प्रमदाः स्त्रियो निजरमणसमागमसङ्गजनितसुखे निराशा आशारहिताः स्थिता आसन्नित्यर्थः॥ १२॥

अर्थ–कमलकी समान सुन्दर नेत्रोंमेंसे निकलते हुए जलकी बूंदोंसे जिनके पल्लवकी समान पतले और मनोहर ओष्ठ धुल गये हैं ऐसी परदेशियोंकी स्त्रियें माला आदि आभूषणोंको और चन्दन आदि अनुलेपनके पदार्थोंको दूर करके निराश हुई बैठी हैं॥ १२॥

विपाण्डुरं कीटरजस्तृणान्वितं
भुजंगवद्वक्रगतिप्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्निरीक्षितं
प्रयाति निम्नाभिमुखं नवोदकम् ॥ १३ ॥

सं०टी०–विपाण्डुरमिति ॥ विपाण्डुरं पाण्डुरवर्णं कीटाश्च रजांसि च तृणानि च तैरन्वितं युक्तं भुजंगवत्सर्पवद्वक्रगतिस्तिर्यग्गमनं प्रसर्पितमितस्ततः संचरणशीलं ससाध्वसैः सभयैर्भेककुलैर्मण्डूकसमुदायैः ।" भेके मण्डूकवर्षाभूशालूरवप्लुददुराः ।" इत्यमरः । निरीक्षितं विलोकितं नवोदकं नूतनजलं निम्नस्य गम्भीरस्य देशस्याभिमुखम् । " निम्नं गभीरं गम्भीरम् " इत्यमरः । प्रयाति गच्छतीत्यर्थः १३॥

अर्थ–कीडे धूलि (कीचड) और तिनकोंसे युक्त अत एव अत्यन्त मैला कुचैला, सर्पकी समान आडी तिर्च्छी चालसे बहता हुआ और घबडाये हुए मैंडकोंसे देखा गया ऐसा नवीन जल नीचे स्थानकी ओरको वहता है ॥ १३ ॥

विपत्रपुष्पां नलिनीं समुत्सुका
विहाय भृङ्गाः श्रुतिहारिनिस्वनाः ।
पतन्ति मूढाः शिखिनां प्रनृत्यतां
कलापचक्रेषु नवोत्पलाशया ॥ १४ ॥

सं०टी०–विपत्रेति ॥ समुत्सुका उत्कण्ठिता श्रुतेः श्रवणस्य हारी । मनआह्लादकर इति यावत् । निस्वनः शब्दो येषां ते तथोक्ता मूढा इदं न त्विदं तन्नलिनमिति विचाररहिता भृङ्गा भ्रमराः । " द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः । " इत्यमरः । विगतानि पत्राणि दलानि यस्य तादृशं पुष्पं यस्याः सा तां तथोक्तां नलिनीं विहाय त्यक्त्वा प्रनृत्यतां नृत्यं कुर्वतां शिखिनां मयूराणां कलापचक्रेषु बर्हमण्डलेषु नवोत्पलस्य नूतनकुवलयस्याशया । भ्रमेणेति भावः । पतन्ति निपतन्तीत्यर्थः ॥ १४ ॥

अर्थ-सुन्दर शब्दोंके द्वारा कानोंके हरनेवाले अर्थात् अपने मनोहर शब्द सुना २ कर मनको हरनेवाले और उत्कण्ठित भ्रमर खिले पत्रवाली कमलिनीको छोडकर नृत्य करते हुए मयूरोंकी पूंछकी चान्द्रिकाके ऊपर नवीन कमलके भ्रमसे मूर्ख हो उड २ कर गिरते हैं ॥ १४ ॥

वनद्विपानां नववारिदस्वनै-
र्मदान्वितानां ध्वनतां मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः
सभृङ्गयूथैर्मदवारिभिश्चिताः ॥ १५ ॥

सं०टी०-वनद्विपानामिति॥ नवाः सद्यः संभृतसलिला ये वारिदा जलदास्तेषां स्वनैर्निनादैः । " शब्दे निनादनिनदध्वनिध्वानरवस्वनाः । " इत्यमरः । कृत्वा । मदान्वितानाम् । अपवारणगर्जनशङ्केति भावः । अत एव मुहुर्मुहुर्वारंवारं ध्वनतां गर्जतां वनद्विपानामारण्यगजानाम् । " द्विपः । मतंगजो गजो नागः " इत्यमरः । विमलानि निर्मलानि यान्युत्पलानि कुवलयानि तेषां प्रभेव प्रभा येषां ते तथोक्ताः । " स्यादुत्पलं कुवलयम् " इत्यमरः । कपोलदेशा गण्डप्रदेशाः सभृङ्गयूथैर्भ्रमरसमुदायसहितैर्मदवारिभिर्दानोद्रेकैश्चिताः । व्याप्ता इत्यर्थः । सौगन्ध्यातिशयाद्भ्रमरैरप्यागत्य तत्र स्थितमिति भावः ॥ १५ ॥

अर्थ-मदसे उन्मत्त हुए और वारंवार गडगड शब्द करनेवाले नवीन हाथियोंके पाठोंके विशेष निर्मल कमलकी समान चमकीले गण्डस्थलोंका नवीन नीरदोंकी समान शब्द करनेवाले भ्रमरोंने मदके जलसे आश्रय लिया है ॥ १५ ॥

सितोत्पलाभाम्बुदचुम्बितोपलाः
समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः
समुत्सुकत्वं जनयन्ति भूधराः ॥ १६ ॥

सं०टी०—सितेति॥सितानि शुभ्राणि यान्युत्पलानि कुवलयानि तेषामाभेवाभा कान्तिः सलिलवर्षणे येषां तादृशा येऽम्बुदा जलदास्तैश्चुम्बिता उपलाः पाषाणा येषां ते तथोक्ताः। "पाषाणप्रस्तरग्रावोपलाश्यानः" इत्यमरः । समन्तत इतस्ततः प्रस्रवणैर्निर्झरैः । "उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ।" इत्यमरः। समाचिता व्याप्ताः। प्रवृत्तमारब्धं नृत्यं नर्तनं यैस्तथोक्तैः। "लास्यं नृत्यं च नर्तने" इत्यमरः। शिखिभिर्मयूरैः समाकुला व्याकुला भूधराः समुत्सुकत्वम् । चित्तस्येति शेषः। जनयन्त्युत्पादयन्तीत्यर्थः॥१६॥

अर्थ—जलसे परिपूर्ण भरे अत एव नम्र हुए मेघोंके द्वारा जिनके शिखर चुम्बन करे गये हैं, चारों ओर झरनोंसे सींचे हुए और नृत्य करनेमें तन मनसे प्रवृत्त हुए मयूरोंसे व्याप्त ऐसे पर्वत प्राणियोंके चित्तमें उत्कण्ठा उत्पन्न करते हैं॥ १६ ॥

कदम्बसर्जार्जुनकेतकीवनं
विकम्पयंस्तत्कुसुमाधिवासितः ।
ससीकराम्भोधरसङ्गशीतलः
समीरणः कं न करोति सोत्सुकम् ॥ १७ ॥

सं०टी०—कदम्बेति ॥ कदम्बो नीपः सर्जोऽश्वकर्णः अर्जुनः ककुभः केतक्यश्च तासां वनं समुदायम् । "नीपप्रियकदम्बास्तु हरिप्रियः"इत्यमरः।"साले तु सर्जकाश्यर्याश्वकर्णकाः सस्यसम्बरः।" इत्यमरः।"इन्द्रद्रुः ककुभोऽर्जुनः" इत्यप्यमरः।विकम्पयंस्तेषां पूर्वोक्तकुसुमानां कुसुमैः पुष्पैरधिवासितः संजाताधिवासः ससीकरो जलकणसहितो योऽम्भोधरो मेघस्तस्य सङ्गेन संसर्गेण शीतलः शीतः समीरणो मारुतः । "समीरमारुतमरुज्जगत्प्राणसमीरणाः।"इत्यमरः।कं पुरुषं सोत्सुकं सोत्कण्ठं न करोति। अपि तु सर्वमेवेत्यर्थः॥

अर्थ—कदम्ब (कदम), सर्ज (साल), अर्जुन (ककुभ, कौह),नीप (पीतशाल), और केतकीके वृक्षोंको कंपित करती हुइ अत एव इन वृक्षोंके पुष्पोंकी सुगन्धिसे मिश्रित, नन्नी २ बूंदाको

बौछार छोडनेवाले बादलोंके संगसे शीतल ऐसी पवन भला किसको उत्कण्ठायुक्त नहीं करती है, अर्थात् शीतल मन्द सुगन्ध पवनके स्पर्शसे सभीके चित्तमें सुरत उत्पन्न हो जाती है ॥ १७ ॥

शिरोरुहैः श्रोणितटावलम्बिभिः
कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः
स्त्रियो रतिं संजनयन्ति कामिनाम् ॥ १८ ॥

सं०टी०–शिरोरुहैरिति ॥ स्त्रियस्तरुण्यः श्रोणितटे कटिपश्चाद्भागेऽवलम्बन्ते तैस्तथोक्तैः शिरोरुहैश्चिकुरैः । " चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः । " इत्यमरः । कृतावतंसैः सुगन्धिभिः कुसुमैः पुष्पैः । " पुष्पं प्रसूनं कुसुमम् " इत्यमरः । सहारैः कुसुममालासहितैः स्तनैः कुचैः । ससीधुभिर्मधुसहितैर्वदनैराननैः कामिनां विलासिनां रतिं प्रीतिं संजनयन्ति सम्यक्प्रकारेणोत्पादयन्तीत्यर्थः ॥ १८ ॥

अर्थ–नितम्बोंपर्यंत लम्बायमान केशोंसे अत्यन्त महकते हुए संचित पुष्पोंसे और हारोंसे शोभायमान उरोजों एवं मदकी गन्धीसे सुगन्धीवाले मुखोंसे स्त्रियें कामी पुरुषोंको रति उत्पन्न करती हैं ॥ १८ ॥

तडिल्लताशक्रधनुर्विभूषिताः
पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला
हरन्ति चेतो युगपत्प्रवासिनाम् ॥ १९ ॥

सं०टी०–तडिल्लतेति ॥ तडिल्लता लताकारा तडिच्छक्रधनुरिन्द्रायुधं च ताभ्यां विभूषिताः शोभिताः । " इन्द्रायुधं शक्रधनुः " इत्यमरः । तोयभरेण जलभारेणावलम्बिनो नम्राः पयोधरा मेघाः

काञ्ची मेखला च मणिकुण्डलानि नानाविधरत्नाखचिततटङ्कानि च तैरुज्ज्वलाः सुन्दराः स्त्रियश्च प्रवासिनां प्रोषितानां चेतोऽन्तःकरणं युगपत्सममेव हरन्त्यपहरन्तीत्यर्थः स्त्रियश्चात्र परकीयाः । प्रवासिनां स्वकीयासांनिध्याभावात् ॥ १९ ॥

अर्थ—तडपती हुई चपलाकी लता धारण करनेवाले, इन्द्रके धनुषकी शोभासे समलंकृत और जलके भारसे नम्र हुए ऐसे नीरद एवं तगडीकी मणि और मेखलाओंसे उज्ज्वल वर्णवाली युवतियें यह दोनों देखनेके साथही पथिकोंके चित्तको मोहित कर लेते हैं ॥ १९ ॥

मालाः कदम्बनवकेसरकेतकीभि-
रायोजिताः शिरसि बिभ्रति योषितोऽद्य ।
कर्णान्तरेषु ककुभद्रुममञ्जरीभि-
रिच्छानुकूलरचितानवतंसकांश्च ॥ २० ॥

सं०टी०—माला इति॥ योषितः स्त्रियोऽद्य कदम्बानि कदम्बकुसुमानि नवकेसराणि नूतनबकुलकुसुमानि केतक्यश्च ताभिरायोजिता ग्रथिताः । " अथ केसरे बकुलम् " इत्यमरः । मालाः स्रजः शिरसि मूर्धनि ककुभद्रुमोऽर्जुनवृक्षस्तस्य मञ्जरीभिः कलिकाभिरिच्छयानुकूलं यथा भवति तथा रचितान्कृतानवतंसा एवावतंसकास्तान् कर्णान्तरेषु कर्णोपरिभागेषु बिभ्रति दधतीत्यर्थः। वसन्ततिलकावृत्तमेतत्।तदुक्तम्। " उक्ता वसन्ततिलका तभजाजगौ गः " इति॥२०॥

अर्थ—आजकल वर्षाऋतुमें स्त्रियें कदंबके नवीन केशर और केतकीके पुष्पोंकी बनाई हुई मालाओंको शिरके ऊपर धारण करती हैं । और अर्जुनवृक्षकी मंजरियोंसे कानको शोभा देनेवाले नवीन करनफूल बनाके धारण करती हैं ॥ २० ॥

कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः
पुष्पावतंससुरभीकृतकेशपाशाः ।

श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात्प्रविशन्ति नार्यः ॥२१॥

सं०टी०-कालागुर्विति ॥ कालागुरुः कृष्णागुरुः स प्रचुरो बहुलो यस्मिंस्तादृशं यच्चन्दनं तेन चर्चितं लिप्तमङ्गं शरीरं यासां तास्तथोक्ताः । पुष्पावतंसेन कुसुमकर्णपूरेण सुरभीकृतः सुगन्धीकृतः केशपाशः कुन्तलसमूहो यासां तास्तथोक्ता नार्यः स्त्रियो जलमुचां घनानां ध्वनिं गर्जनं श्रुत्वाकर्ण्य त्वरितं शीघ्रं प्रदोषे रजनीमुखे गुरुगृहाच्छ्वशुरगृहं परित्यज्य शय्यागृहं प्रविशन्तीत्यर्थः ॥ २१ ॥

अर्थ-काले अगर और घने चन्दनसे व्याप्त देहवाली स्त्रियें पुष्पोंकी कलियोंसे केशपाशोंको सुगन्धित कर सन्ध्याके समय बादलोंका गर्जना सुनकर सास श्वसुरके घरोंमेंसे शीघ्रही शयनागारमें (पतिके निकट) चली जाती हैं ॥ २१ ॥

कुवलयदलनीलैरुन्नतैस्तोयनम्रै-
र्मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः
पथिकजनवधूनां तद्वियोगाकुलानाम् ॥२२॥

सं०टी०-कुवलयेति ॥ कुवलयस्य नीलोत्पलस्य दलं पत्रमिव नीलैः श्यामवर्णैरुन्नतैरुच्चस्थैस्तोयनम्रैर्जलनम्रैर्मृदुना लघुना पवनेन वातेन विधूताः कम्पितास्तैरत एव मन्दमन्दमातिमन्थरं चलद्भिर्गच्छद्भिः सेन्द्रचापैरिन्द्रधनुषा सहितैस्तोयदैर्मेघैस्तेषां पान्थजनानां वियोगेन विरहेणाकुला व्याकुलास्तासां पथिकजनवधूनां विरहिणीनां चेतोऽन्तःकरणमपहृतमिव हृत्वानीतमिवेत्युत्प्रेक्षा । मालिनीवृत्तमेतत् । लक्षणं तूक्तम् ॥ २२ ॥

अर्थ-अपने २ स्वामियोंके वियोगसे जिनके हृदय विदीर्ण हो गये हैं ऐसी पथिकोंकी स्त्रियोंके मनको कमलदलकी समान नीले, अत्यंत उन्नत परंतु जलके भारसे नम्र हुए, मन्द २ पवनसे कम्पित

करे गये अत एव शनैः २ चलनेवाले और चन्द्रमा तथा इन्द्रधनुषधारी मेघोंने मानो सचमुचही हर लिया है ॥ २२ ॥

मुदित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकच्छिन्नतापो वनान्तः॥२३॥

सं०टी०—मुदित इति॥नवस्य नूतनस्य सलिलस्य निषेकेण सेवनेन छिन्न उच्छिन्नस्तापो यस्य स तथोक्तो वनान्तोऽरण्यप्रान्तो जातपुष्पैः प्रादुर्भूतकुसुमैः कदम्बैर्नीपवृक्षैर्मुदित इव समन्तादितस्ततः पवनेन वायुना चलिताः कम्पिताः शाखा यैस्तथोक्तैः शाखिभिर्वृक्षैः। " वृक्षो महीरुहः शाखी विटपी पादपस्तरुः । " इत्यमरः । नृत्यतीव नृत्यं करोतीवेत्युत्प्रेक्षा । एवमन्यत्रापि । केतकीनां सूचिभिः कण्टकैर्हसितमिव हास्यमिव विधत्ते दधतीत्यर्थः ॥ २० ॥

अर्थ—यह वनप्रदेश चारों ओरसे फूले हुए कदम्बके वृक्षोंके देखनेसे प्रसन्न हुआसा प्रतीत होता है, वृक्षोंकी शाखायें पवनके लगनेसे हिल रही हैं अत एव नाचतासा दीखता है, केतकीकी कलियोंसे हँसते हुएकी समान जान पडता है और नया जल छिडक जानेसे इसका संपूर्ण सन्ताप शान्त हो गया है ॥ २३ ॥

शिरसि बकुलमालां मालतीभिः समेतां
विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च ।
विकचनवकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत्काल एषः ॥ २४ ॥

सं०टी०—शिरसीति ॥ जलदानां मेघानामोघः संघातो यस्मिन् स तथोक्तः । " स्तोमौघनिकरव्रातवारसंघातसंचयाः । " इत्यमरः । एष कालो वर्षाकालः कान्तवत्प्रियवद्वधूनां स्त्रीणां शिरसि मूर्धनि

मालतीभिर्मालतीकुसुमैः समेतां युक्तां बकुलमालां केसरस्रजं रचयति करोति। तथा विकसितनवपुष्पैः संफुल्लनूतनकुसुमैर्यूथिकाया मागधीलतायाः कुड्मलानि मुकुलानि तैः। "अथ मागधी। गणिका यूथिकाम्बष्ठा" इत्यमरः। "कुड्मलो मुकुलोऽस्त्रियाम्" इतिचामरः। विकचानि विकसितानि नवानि नूतनानि यानि कदम्बानि कदम्बकुसुमानि तैश्च कर्णपूरं कर्णोत्तंसं रचयति करोतीत्यर्थः॥ २४॥

अर्थ-यह वर्षाका समय प्यारे पतिकी समान कान्ताओंके सिरके ऊपर मालतीसे युक्त अशोकके पुष्पोंकी मालाको और फूले हुए नूतन पुष्पोंसे समन्वित जूहीकी कलियोंसे एवं कदम्ब और कचनारके पुष्पोंसे स्त्रियोंके करणफूलोंकी रचना करता है॥ २४॥

दधति वरकुचाग्रैरुन्नतैर्हारयष्टिं
प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः।
नवजलकणसेकादुद्गतां रोमराजीं
ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः॥ २५॥

सं०टी०-दधतीति॥ नार्यः स्त्रिय उन्नतैरूर्ध्वमुखैर्वरा उत्तमाः। पीना वर्तुलाश्चेति यावत्। ये कुचाः स्तनास्तेषामग्रैरग्रभागैर्हारयष्टिं मुक्ताहारमायतैर्दीर्घैः श्रोणिबिम्बैः कटिपश्चाद्भागैः प्रतनूनि सूक्ष्माणि सितानि श्वेतवर्णानि यानि दुकूलानि वस्त्राणि तानि ललितानां सुन्दराणां वलीनां त्रिवलीनां विभङ्गा तेषु तैस्तथोक्तैर्मध्यदेशैर्नवानां जलकणानां सेकादुद्गतामुत्पन्नां रोमराजीं रोमाञ्चपंक्तिं दधतीत्यर्थः॥ २५॥

अर्थ-यह स्त्रियें ऊंचे २ कुचाओंके अग्रभागके ऊपर हारकी लडियोंको, अत्यन्त पुष्ट नितम्बोंके ऊपर झीने और श्वेत वस्त्रोंको एवं तुरन्त स्नान करनेके कारण खडी हुई रोमावलीको त्रिवलीसे तीन विभागवाले मध्यभागके ऊपर धारण करती हैं॥ २५॥

नवजलकणसङ्गाच्छीततामादधानः

कुसुमभरनतानां लासकः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभिः
परिहरति नभस्वान्प्रोषितानां मनांसि ॥ २६ ॥

सं०टी०—नवेति ॥ नवानां नूतनानां जलकणानां सङ्गात्संबन्धाच्छीततां शैत्यमादधानो गृह्णन्कुसुमानां पुष्पाणां भरेण नता नम्रास्तेषां तथोक्तानां पादपानां वृक्षाणां लासकः संसर्गवान् । एतेन मान्द्यमुक्तम् । केतकीनां रजोभिः परागैः । " परागः सुमनोरजः " इत्यमरः । जनित उत्पादितो रुचिरः सुन्दरो गन्धो यस्मिंस्तथोक्तो नभस्वान्वायुः प्रोषितानां पान्थजनानां मनांस्यन्तःकरणानि परिहरति उत्कयतीत्यर्थः ॥ २६ ॥

अर्थ—नवीन जलके छिडकनेसे अर्थात् नम्री २ बूंदोंके पडनेसे शीतलताको धारण करनेवाला, पुष्पोंके भारसे झुके हुए वृक्षोंको भग्न करनेवाला एवं केतकीके पुष्पोंकी परागसे मनोहर सुगन्धि फैलाता हुआ पवन परदेशियों अथवा पतिवियोगिनी स्त्रियोंके मनमें क्षोभ उत्पन्न करता है ॥ २६ ॥

जलधरविनतानामाश्रयोऽस्माकमुच्चै-
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥ २७ ॥

सं०टी०—जलधरेति ॥ तोयनम्रा जलभारनतास्तोयदा मेघा जलधरेण विनतानां नम्राणामस्माकमुच्चैरुन्नतोऽयं विन्ध्याचल आश्रय आधारः । भवतीति शेषः । इतीति हेतोरतिशयमत्यन्तं परुषाः कठिनास्ताभिस्तथोक्ताभिर्ग्रीष्मवह्नेः शिखाभिः सम्यगुपजनित उत्पादितस्तापः संतापो यस्य तं तथोक्तं विन्ध्यं विन्ध्याद्रिं जलसेकैर्जलवर्षणैर्ह्लादयन्ति हर्षं प्रापयन्तीवेत्युत्प्रेक्षा । उपकृतो हि विपन्नं परमुपकरोतीति भावः ॥ २७ ॥

अर्थ–अत्यन्त ऊंचा यह विन्ध्याचल हम जलके भारसे नम्र हुओंका आश्रय है इसी कारण अत्यन्त प्रचण्ड ग्रीष्मऋतुकी गर्मीरूप अग्निकी शिखाओंसे सन्तप्त हुए विन्ध्याचलको मानो यह बादल जलकी बूंदोंसे सचमुचही आनन्दित करते हैं ॥ २७ ॥

बहुगुणरमणीयः कामिनीचित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः।
जलदसमय एष प्राणिनां प्राणभूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि ॥२८॥

सं०टी०–बहुगुणेति ॥ बहुगुणैः रमणीयः सुन्दरः कामिनीनामङ्गनानां चित्तहारी। मनोऽनुरञ्जक इति यावत्। तरुविटपा वृक्षशाखा लता वल्लयश्च तासाम्। (क्वचित्पुस्तके "नतविटपिलतानाम्" इति पाठः। तदर्थस्तु नता नम्रा ये विटपिनः शाखिनो लताश्च तासामिति)। "वल्ली तु व्रततिर्लता" इत्यमरः। बान्धवो बन्धुः। निर्विकारो विकारशून्यः प्राणिनां जन्तूनाम्। "प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः" इत्यमरः। प्राणभूतो जीवभूत एष जलदसमयो वर्षाकालस्तव प्रायशो बहुशो वाञ्छितान्यभिलषितानि हितानीष्टानि दिशतु ददात्वित्यर्थः ॥ २८ ॥

इति भारद्वाजगोत्रोत्पन्नमणिरामविरचितया चन्द्रिकाख्यया व्याख्यया समेतः कविश्रीकालिदासकविवराग्रणीकृतावृतुसंहारे महाकाव्ये प्रावृड्वर्णनं नाम द्वितीयः सर्गः ॥२॥

अर्थ–अनेक प्रकारके सुन्दर गुणोंसे रमणीय, अत एव स्त्रियोंका चित्तचोर, पौधे वृक्ष और लताओंका निर्विकार अर्थात् हित करनेवाला बन्धु, प्राणिमात्रके जीवनका एक मात्र कारण यह वर्षाकाल तुम्हारे समस्त मनोरथोंको सफल करै ॥ २८ ॥

इति श्रीव्रजरत्नभट्टाचार्य्यकृतौ कामिनीसमाख्यायां भाषाव्याख्यायां वर्षावर्णनं नाम द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ।

काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरवनूपुरनादरम्या ।
आपक्कशालिरुचिरा तनुगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रूपरम्या ॥ १ ॥

सं०टी०—अथ क्रमप्राप्तं शरत्कालं वर्णयति—काशांशुकेति ॥ काशमेव काशकुसुममेवांशुकं वस्त्रं यस्याः सा तथोक्ता । पक्षे काशमिवांशुकं वस्त्रं यस्याः सेति । विकचं विकसितं यत्पद्मं तदेव मनोज्ञं सुन्दरं वक्त्रं मुखं यस्याः सा तथोक्ता । पक्षे विकचं विकसितं यत्पद्मं तदिव मनोज्ञं सुन्दरं वक्त्रं मुखं यस्याः सेति । "प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः । फुल्लश्चैते विकसिते" इत्यमरः । "वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्" इत्यमरः । सोन्मादानामुन्मादसहितानां हंसानां रवः शब्द एव नूपुरनादो मञ्जीरध्वनिस्तेन रम्या रमणीया । पक्षे सोन्मादहंसर व इव नूपुरनादस्तेन रम्या । "शब्दे निनादनिनदध्वनिध्वानरवस्वनाः" इत्यमरः । "मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः । आ समन्तात्पक्का परिणता शालिरेव रुचिरा सुन्दरा तन्वी गात्रयष्टिः शरीरलता यस्याः । पक्ष आपक्कशालिरिव रुचिरा तनुर्गात्रयष्टिर्वपुः संहननं यस्याः । "शरीरं वर्ष्म विग्रहः" इत्यमरः । रूपरम्या शरन्नववधूरिव प्राप्तागतेत्यर्थः । वसन्ततिलका वृत्तम् ॥ १ ॥

अर्थ—खिली हुई काशके वस्त्र धारण करनेवाली, प्रफुल्ल कमलोंका मनोहर मुख बनाये, तथा मदसे उन्मत्त हुए हंसोंके शब्दरूप मनोहर नूपुर धारण करनेवाली, तथा समन्तात् परिपक्व हुए धानोंसे ललित अत एव छरैरी शरीररूप यष्टि धारण करनेवाली यह शरद ऋतु अति सुन्दरी नवीन वधूकी समान प्राप्त हुई है ॥ १ ॥

काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥ २ ॥

सं०टी०–काशैरिति ॥ काशैः काशपुष्पैर्मही पृथ्वी । शिशिरदीधितिना चन्द्रेण रजन्यो रात्रयः । हंसैः सरितां नदीनां जलानि । कुमुदैः कैरवैः । " सिते कुमुदकैरवे " इत्यमरः । सरांसि कासाराः । " कासारः सरसी सरः " इत्यमरः । कुसुमभारेण नता नम्रास्तैस्तथोक्तैः सप्तच्छदैः सप्तपर्णैर्वृक्षविशेषैर्वनान्ता अरण्यप्रान्ताः । मालतीभिर्जातीभिश्च । " सुमना मालती जाती " इत्यमरः । उपवनान्यारामाः । " आरामः स्यादुपवनं कृत्रिमं वनमेव यत् " इत्यमरः । शुक्लीकृतानीति लिङ्गवचनविपरिणामेनान्वयः ॥ २ ॥

अर्थ–फूले हुए कासके वृक्षोंने समस्त भूमीको, शीतल किरणोंवाले चन्द्रमाने रात्रियोंको और हंसपक्षियोंने नदियोंके जलको, बबूलेके फूलोंने सरोवरोंको, एवं पुष्पोंके भारसे नीचेको झुके हुए सप्तपर्णके वृक्षोंने संपूर्ण वनोंको अथ च मालतीने छोटे २ बगीचोंको बिलकुल श्वेत बना दिया है ॥ २ ॥

चञ्चन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः ।
नद्यो विशालपुलिनान्तनितम्बबिम्बा
मदं प्रयान्ति समदाः प्रमदा इवाद्य ॥ ३ ॥

सं०टी०–चञ्चदिति ॥ चञ्चती चञ्चला मनोज्ञा सुन्दरा शफर्येव प्रोष्ठ्येव रसनाकलापः काञ्चीगुणो यासां तास्तथोक्ताः । पक्षे चञ्चन्मनोज्ञशफरीव रसनाकलापो यासां ताः । " प्रोष्ठी तु शफरी द्वयोः " इत्यमरः । पर्यन्ते प्रान्तभागे संस्थितोपविष्टा या सिता-

ण्डजानां धवलमरालादीनां पंक्तिः श्रेणी सैव हारो यासां तास्तथोक्ताः । " पंक्तिः, श्रेणी लेखास्तु राजयः " इत्यमरः । पक्षे पर्यन्तसंस्थितसिताण्डजपंक्तिरिव हारो यासां ताः । विशालो विस्तीर्णो यः पुलिनान्तस्तीरप्रान्तः स एव नितम्बबिम्बं कटिपश्चाद्भागो यासां तास्तथोक्ता नद्यः सरितः । " अथ नदी सरित् " इत्यमरः । समदा यौवनमदगर्विताः प्रमदाः स्त्रिय इव मन्दं मन्थरं यथा भवति तथाद्य प्रयान्ति गच्छन्तीत्यर्थः ॥ ३ ॥

अर्थ–मनोहर शब्द करनेवाली छोटी २ मछलियोंकी तगडी धारण करे और किनारोंके ऊपर कतार बांधके बैठे हुए बगले आदि पक्षियोंकी श्रेणीरूप हारको धारण करनेवाली, एवं बडे२ विशाल किनारेही जिनके नितम्ब और जंघा हैं ऐसी नदियें आजकल मदमाती अबलाओंकी समान मन्द २ गमन करती हैं ॥ ३ ॥

व्योम क्वचिद्रजतशङ्खमृणालगौरै-
स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।
संलक्ष्यते पवनवेगचलैः पयोदै
राजेव चामरवरैरुपवीज्यमानः ॥ ४ ॥

सं०टी०–व्योमेति ॥ त्यक्तं निवृत्तमम्बु यैस्तथोक्तैरत एव रजतं च शङ्खश्च मृणालं च रजतशङ्खमृणालानि तानीव गौरा गौरवर्णास्तैस्तथोक्तैः । लघुतया शतशः प्रयातैः पवनस्य वायोर्वेगेन चलाश्चञ्चलास्तैस्तथोक्तैः पयोदैर्व्योमाकाशं क्वचित्कुत्रचिद्भागे चामरवरैश्चामरश्रेष्ठैरुपवीज्यमानो राजेव संलक्ष्यते दृश्यत इत्यर्थः ॥ ४ ॥

अर्थ–कहीं कहीं चांदी, शंख और कमलोंकी समान गौर वर्णवाले, जल बरस जानेके कारण अत्यन्त हलके होजानेसे शीघ्र चलनेवाले और पवनके वेगसे चलते हुए सैकडों बादलोंके द्वारा यह आकाश जिसके ऊपर सैकडों चमर डुलाये गये हों ऐसे राजाकी समान प्रतीत होता है ॥ ४ ॥

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परचितारुणता च भूमिः ।
वप्राश्च चारुकमलावृतभूमिभागाः
प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ॥ ५ ॥

सं०टी०-भिन्नेति ॥ भिन्नो विभिन्नो योऽञ्जनप्रचयः कज्जल-समूहस्तद्वत्कान्तिर्यस्य तत्तथोक्तम् । मनोज्ञं सुन्दरं नभ आकाशम् । बन्धूकानां जीवबन्धूकानां पुष्पैः कुसमै रचिता कृतारुणता यस्याः सा तथोक्ता । "बन्धूको बन्धुजीवकः" इत्यमरः । भूमिश्च । चारूणि सुन्दराणि यानि कमलानि तैरावृता आच्छादिता भूमिभागा येषां ते तथोक्ता वप्राः प्राकाराश्च । " स्याच्चयो वप्रमस्त्रियाम् । प्राकारो वरणः शालः " इत्यमरः । भुवि कस्य यूनो मनो न प्रोत्कण्ठयन्ति प्रोत्कर्षणेन नोत्कण्ठयन्ति । अपि तु सर्वस्यापीति विभक्तिविपरिणामेनान्वयः ॥ ५ ॥

अर्थ-विखरे हुए अंजनके समूहकी तुल्य नीली कान्तिवाला अत एव मनोहर आकाश और दुपहरियाके पुष्पोंकी रजसे लाल २ हुई भूमी, एवं परिपक्व हुए धानोंसे समाच्छादित हुए भूमीके भाग और परकोटे इस भूमीके ऊपर किस तरुण पुरुषके मनको उत्कण्ठित नहीं करते हैं । भाव यह है कि, उपरोक्त सुख सामग्रियोंको देखकर सभी तरुणोंके चित्तमें लगन लग जाती है ॥ ५ ॥

मन्दानिलाकुलितचारुतराग्रशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ॥६॥

सं०टी०-मन्देति ॥ मन्देन मन्थरेणानिलेन पवनेनाकुलिताश्चारुतरी अतिसुन्दरा अग्रशाखा यस्य तथोक्तः । पुष्पोद्गमस्य कुसु-

मप्रादुर्भावस्य प्रचयेनाधिक्येन कोमलानि मृदूनि पल्लवाग्राणि यस्य स तथोक्तः । मत्तद्विरेफैरुन्मत्तभ्रमरैः परिपीतो मधुप्रसेको मकरन्दप्रस्रवो यस्य स तथोक्तः कोविदारश्चमरिकवृक्षः । " कोविदारे चमरिकः कुद्दालो युगपत्रकः " इत्यमरः । कस्य चित्तं न विदारयति । अपि तु सर्वस्यापि विदीर्णं करोतीत्यर्थः ॥ ६ ॥

अर्थ–मन्द पवनके लगनेसे जिसकी पवित्र और लम्बी २ शाखायें हिलती हैं, कलियें और कोमल २ कोंपल धारण करनेवाला एवं जिसके मधुको मदमाते भ्रमरोंने खूब गले तक भरके पान किया है ऐसा कोविदारवृक्ष भला किसके चित्तको टूक २ नहीं करता अर्थात् ऐसे कोविदारको देखनेसे सबके चित्तको कामदेव विदीर्ण करने लगता है ॥ ६ ॥

तारागणप्रवरभूषणमुद्वहन्ती
मेघावरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी दधाना
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥ ७ ॥

सं०टी०–तारागणेति ॥ ताराणां नक्षत्राणां गणः समुदाय एव प्रवरमुत्तमं भूषणम् । पक्षे तारागण इव प्रवरं भूषणम् । " नक्षत्रमृक्षं भं तारा" इत्यमरः । उद्वहन्ती दधती। मेघैः कृत्वा योऽवरोधो व्यवधानं तस्मात्परिमुक्तो यः शशाङ्कश्चन्द्रः स एव वक्त्रं वदनं यस्याः सा । पक्षे मेघ इव योऽवरोधो वधूटिवयोऽवलम्बनीयो मुखवसनाच्छादनं व्यवहारस्ततः परिमुक्तं तन्नियमानधीनं शशाङ्कमिव चन्द्रमिव वक्त्रं मुखं यस्याः सा । अमलं निर्मलं ज्योत्स्नैव दुकूलं वसनं दधाना परिधानं कृतवती सा । पक्षे ज्योत्स्नेवामलं दुकूलं दधाना सेति । "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः । रजनी यामिनी । "रजनी यामिनी तमिः " इत्यमरः । प्रमदा बाला चानुदिनं प्रतिदिनं वृद्धिं प्रयाति गच्छतीत्यर्थः ॥ ७ ॥

अर्थ-अनगिनत तारागणोंका आभूषण धारण करनेवाली, बादलोंका आवरण दूर हो जानेसे निर्मल कान्तिवाले चन्द्रमारूप सुन्दर मुखवाली रात्रि छिटकी हुई निर्मल चान्दनीका वस्त्र धारण करके चढती उम्रकी स्त्रीकी तुल्य वृद्धिको प्राप्त होती है ॥ ७ ॥

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसचयाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ॥ ८ ॥

सं०टी०-कारण्डवेति ॥ कारण्डवानां पक्षिविशेषाणामाननैर्वदनैर्विघट्टिता वीचिमालास्तरङ्गपंक्तयो यासु तास्तथोक्ताः । "भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः" इत्यमरः । कादम्बानां कलहंसानां सारसानां पुष्कराह्वानां चयेन समुदायेनाकुलो व्याकुलस्तीरदेशो यासां तास्तथोक्ताः । "कादम्बः कलहंसः स्यात्" इत्यमरः । "पुष्कराह्वस्तु सारसः" इत्यमरः । सरोरुहाणां कमलानां रजोभी रेणुभिररुणिता आरक्ताः । "परागः सुमनोरजः" इत्यमरः । तटिन्यस्तरङ्गिण्यः । "तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी" इत्यमरः । परितः समन्ततो हंसानां मरालानां विरुतैः शब्दैः "तिरश्चां वाशितं रुतम्" इत्यमरः । जनस्य लोकस्य प्रीतिं कुर्वन्ति जनयन्तीत्यर्थः ॥ ८ ॥

अर्थ-चकवी चकवे अपने मुखोंसे नदियोंके तरंगसमुदायको छिन्न भिन्न करते हैं, नदियोंके दोनों किनारोंके ऊपर बदक और सारसोंके झुण्ड सटे बैठे हैं और कमलोंकी रजसे रक्त वर्णवाली ऐसी नदियें हंसोंके मनोहर शब्द सुनाकर चारों ओरसे मनुष्योंके चित्तको प्रसन्न करती हैं ॥ ८ ॥

नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः शिशिरसीकरवारिवर्षी ।

पत्युर्वियोगविषदिग्धशरक्षतानां
चन्द्रो दहत्यतितरां तनुमङ्गनानाम् ॥ ९ ॥

सं०टी०—नेत्रोत्सव इति ॥ नेत्राणां लोचनानामुत्सवो हर्षजनकः । " लोचनं नयनं नेत्रम् " इत्यमरः । हृदयहारिणी मरीचिमाला किरणपङ्क्तिर्यस्य स तथोक्तः। प्रकर्षेण ह्लादको हर्षजनकः। शिशिरं शीतलं सीकराणां वारि वारिकणं वर्षति स तथोक्तश्चन्द्रः सुधाकरः पत्युः प्रियस्य वियोगो विरह एव विषदिग्धशरो बाणस्तेन क्षता व्रणितास्तासां तथोक्तानामङ्गनानां विरहिणीनां तनुं शरीरमतितरामत्यन्तं दहति संतापयतीत्यर्थः ॥ ९ ॥

अर्थ—हृदयको आकर्षण करनेवाली किरणें धारण करनेवाला अत एव नेत्रोंको उत्सव (आनन्द) देनेवाला, पालेकी नन्ही २ बूंदोंसे जल वरसाके अत्यन्त आल्हादित करनेवाला चन्द्रमा पतिके वियोगरूप विषसे बुझे हुए कामबाणसे घायल हुई स्त्रियोंके शरीरको प्रतिदिन भस्म करता है ॥ ९ ॥

आकम्पयन्फलभरानतशालिजाला-
नानर्तयंस्तरुवरान्कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां नलिनीं विधुन्व-
न्यूनां मनश्चलयति प्रसभं नभस्वान् ॥ १० ॥

सं०टी०—आकम्पयन्निति ॥ फलानां भरेण भारेणानता नम्रा ये शालिजालाः शालिसमूहास्तानाकम्पयन् । कुसुमावनम्रांस्तरुवरान्वृक्षश्रेष्ठानानर्तयन् । एतेन पवने मान्द्यमावेदितम् । उत्फुल्लानि विकसितानि पङ्कजानि कमलानि यस्मिंस्तादृशं वनं जलं यस्यां तां तथोक्ताम् । " जलम् । पयः कीलालममृतं जीवनं भुवनं वनम् " इत्यमरः । नलिनीं कमलिनीं विधुन्वन्विकम्पयन् । एतेन तस्मिन्सौगन्ध्यं शैत्यं चावेदितम् । नभस्वान्वायुर्यूनां तरुणानां मनः प्रसभमत्यन्तं चलयति चञ्चलयतीत्यर्थः ॥ १० ॥

अर्थ-फलके भारसे नम्र हुए धानोंके खेतको कंपित करती और पुष्पोंके बोझसे झुके हुए कुरबकके वृक्षोंको नचाती, एवं खिले हुए कमलसमुदाय तथा कमलिनियोंको थर २ कँपाती हुई पवन तरुण पुरुषोंके मनको अत्यन्त उन्मत्त बना देती है ॥ १० ॥

सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छप्रफुल्लकमलोत्पलभूषितानि ।
मन्दप्रभातपवनोद्गतवीचिमाला-
न्युत्कण्ठयन्ति सहसा हृदयं सरांसि ॥११॥

सं०टी०-सोन्मादेति ॥ सोन्मादानामुन्मादसहितानां हंसानां मरालानां मिथुनैर्द्वन्द्वैरुपशोभितानि भूषितानि । अपि च स्वच्छानि निर्मलानि प्रफुल्लानि च यानि कमलानि पद्मान्युत्पलानि नीलेन्दीवराणि च तैर्भूषितानि शोभितानि । मन्देन मन्थरेण प्रभातपवनेनोषःकालीनेन वायुनोद्गता उत्पन्ना वीचिमालास्तरङ्गपङ्क्तयो येषु तानि तथोक्तानि सरांसि सरोवराणि । जनानामिति शेषः । हृदयं सहसोत्कण्ठयन्त्युत्कण्ठायुक्तं कुर्वन्तीत्यर्थः ॥ ११ ॥

अर्थ-मदोन्मत्त हंसोंके जोडोंसे शोभायमान, अत्यन्त निर्मल और खिले हुए कमलपत्रोंसे विभूषित ऐसे सरोवर मन्द २ पवनके प्रचारसे उठी हुई तरंगमालाओंसे तुरन्तही हृदयको उत्कण्ठित करते हैं अर्थात् हिलोरें लेते हुए सरोवरोंके तीरपर हंस और कमल देखनेसे प्रियसमागमके लिये चित्त उत्कण्ठित होने लगता है॥११॥

नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥१२॥

सं०टी०-नष्टमिति ॥ अद्येदानीं जलदानां मेघानामुदरेषु गर्भेषु ।

दृश्यमानमिति शेषः । बलनामकं दैत्यं भिनत्ति विदारयति । हन्तीति यावत् । तस्य बलभिदो बलारातेरिन्द्रस्य धनुः कार्मुकं नष्टं गतम् । न दृश्यत इत्यर्थः । वियत आकाशस्य पताका सौदामिनी तडिन्न स्फुरति न दीव्यति । बलाका बिसकण्ठिकाः । "बलाका बिसकण्ठिका" इत्यमरः । पक्षाणां पत्राणां पवनैर्वीतैः । "गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम्" इत्यमरः । नभौ न धुन्वन्ति न कम्पयन्ति । उन्नतमूर्ध्वं मुखं वदनं मेघादिदृक्षया येषां ते तथोक्ता मयूरा बार्हिणो गगनमाकाशं न पश्यन्ति नावलोकयन्तीत्यर्थः ॥ १२ ॥

अर्थ—मेघ बरसानेवाले बादलोंके उदरमें अर्थात् बादलोंकी आडमें इन्द्रका धनुष छिप गया, आजकल आकाशमें पताकाकी समान चपला नहीं चमकती, बगले अपने २ पर कम्पित कर आकाशमें पवनका संचार नहीं करते और मयूरगण ऊपरको मुख उठाये आकाशकी ओर नहीं निहारते हैं ॥ १२ ॥

नृत्यप्रयोगरहिताञ्छिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।
मुक्त्वा कदम्बकुटजार्जुनसर्जनीपा-
न्सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥ १३ ॥

सं०टी०—नृत्येति ॥ मदनः कंदर्पो नृत्यप्रयोगेन नर्तनप्रयोगेन रहिताञ्छिखिनो बार्हिणो विहाय त्यक्त्वा मधुरं प्रगीतं गानं येषां तांस्तथोक्तान्हंसानुपैति प्राप्नोति । कुसुमानां पुष्पाणामुद्गम उत्पत्तिस्तस्य श्रीः शोभा कदम्बो धूलिकदम्बः कुटजः शक्रनामको वृक्षविशेषः अर्जुनः ककुभवृक्षः सर्जः शालवृक्षः नीपः पूर्वोक्तकदम्बभिन्नकदम्बस्तान् । "अथ कुटजः शक्रः" इत्यमरः । "इन्द्रद्रुः ककुभोऽर्जुनः" इत्यमरः । मुक्त्वा त्यक्त्वा सप्तच्छदान्सप्तपर्णवृक्षानुपगता प्राप्तेत्यर्थः ॥ १३ ॥

अर्थ—नृत्यक्रियारहित मयूरोंको छोडकर कामदेव मधुरस्वरसे गान करनेवाले हंसोंको प्राप्त होता है और पुष्पोद्गमकी शोभा कदम्ब, कुटज, अर्जुन, सर्ज और नीपके वृक्षोंको छोडकर सप्तच्छदके वृक्षोंको प्राप्त होती है ॥ १३ ॥

शेफालिकाकुसुमगन्धमनोहराणि
स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥ १४

सं०टी०—शेफालिकेति ॥ शेफालिका सुवहा तस्याः कुसुमानां पुष्पाणां गन्धेन मनोहराणि सुन्दराणि । "शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा" इत्यमरः । स्वस्थमनुद्वेगं तीव्रतराणि तापदावानलादिदुःखाभावाद्यथा भवति तथा स्थितानामुपविष्टानामण्डजानां पक्षिणां कोकिलादीनां कुलैः समुदायैः प्रतिनादितानि प्रतिध्वनितानि। पर्यन्ते संस्थितानां प्रान्तस्थितानां मृगीणां हरिणीनां नयनानि लोचनान्येवोत्पलानि कुवलयानि येषु तानि तथोक्तान्युपवनान्युद्यानानि पुंसां मनांसि प्रोत्कण्ठयन्ति समुत्कण्ठितानि कुर्वन्तीत्यर्थः ॥ १४ ॥

अर्थ—सुन्दर महकते हुए हारसिंहारके पुष्पोंकी सुगन्धिसे मनको हरनेवाले और स्वच्छ पक्षिगणोंके शब्दोंसे शब्दायमान बगीचे चौतर्फा सुखसे बैठी हुई मृगियोंके नेत्ररूप कमलोंकी शोभासे पुरुषोंके मनको उत्कण्ठित बना देते हैं ॥ १४ ॥

कह्लारपद्मकुमुदानि मुहुर्विधुन्वं-
स्तत्संगमादधिकशीतलतामुपेतः ।
उत्कण्ठयत्यतितरां पवनः प्रभाते
पत्रान्तलग्नतुहिनाम्बुविधूयमानः ॥ १५ ॥

१ सप्तच्छदके वृक्षके ऊपर सात २ पत्तोंका एक २ गुच्छा होता है ।

सं०टी०–कह्लारेति ॥ कह्लारपद्मकुमुदानि कह्लारं सौगन्धिकं पद्मं नलिनं कुमुदं कैरवं तानि । " सौगन्धिकं तु कह्लारम् " इत्यमरः । " वा पुंसि पद्मं नलिनम् " इत्यमरः । " सिते कुमुद-कैरवे " इत्यमरः । मुहुर्वारंवारं विधुन्वन् । तेषां संगमात्स्पर्शादधिकमत्यन्तं शीतलतामुपेतः प्राप्तः । पत्रान्ते दलप्रान्ते लग्नं यत्तुहिनाम्बु हिमजलं तद्विधूयते स तथोक्तो विधूयमानः पवनो वायुः प्रभाते प्रातःकालेऽतितरामत्यन्तमुत्कण्ठयत्युत्सुकयतीत्यर्थः ॥१५॥

अर्थ–कल्हार कमल और पुष्पोंको कम्पित करनेवाला अत एव उनके संसर्गसे अति शीतलताको प्राप्त होकर वायु प्रभातके समय स्त्रियोंके मनको उत्कण्ठित करता है और वृक्षोंके पत्तोंके ऊपर रक्खे हुए ओसके कणकोंको हरता है ॥ १५ ॥

संपन्नशालिनिचयावृतभूतलानि
स्वस्थस्थितप्रचुरगोकुलशोभितानि ।
हंसैः ससारसकुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति नृणां प्रमोदम्॥१६॥

सं०टी०–संपन्नेति ॥ संपन्नानां जलसिक्तानां शालीनां निचयेन समूहेनावृतानि छादितानि भूतलानि येषां तानि तथोक्तानि । स्वस्थमनुद्वेगं स्थितानां प्रचुराणां बह्वीनां गवां कुलैः समुदायैः शोभितानि भूषितानि । सारसानां पक्षिविशेषाणां कुलैः सहितास्तैस्तथोक्तैर्हंसैः प्रतिनादितानि सीमान्तराणि नृणां जनानां प्रमोदं हर्षं जनयन्त्युत्पादयन्तीत्यर्थः ॥ १६ ॥

अर्थ–भूमीके ऊपर धानोंके ढेरके ढेर पडे हैं और ग्रामोंकी सीमाओंके धोरे अनगिन्त गौएं सुखपूर्वक सावधानीसे बैठी हैं अत एव सीमाएँ सुशोभित हो रही हैं, हंस एवं सारसोंके नादसे शब्दायमान ऐसी ग्रामकी सीमा मनुष्योंके मनमें प्रमोद उत्पन्न करती है ॥ १६ ॥

---

१ सन्ध्याके समय खिलनेवाले श्वेतकमलको कल्हार कहते हैं ।

हंसैर्जिता सुललिता गतिरङ्गनाना-
मम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।
नीलोत्पलैर्मदकलानि विलोकितानि
भूविभ्रमाश्च रुचिरास्तनुभिस्तरंगैः ॥ १७॥

सं०टी०—हंसैरिति ॥ अङ्गनानां पुरंध्रीणां सुललितात्यन्तं रमणीया गतिर्हंसैर्जिता । मुखचन्द्रस्य वदनचन्द्रस्य कान्तिः शोभा विकसितैर्विकचैरम्भोरुहैर्जिता । मदेन कलानि मधुराणि विलोकितान्यवलोकितानि नीलोत्पलैर्जितानि । रुचिराः सुन्दरा भ्रूविभ्रमाश्च तनुभिः सूक्ष्मैस्तरंगैर्वीचिभिर्जिता इति लिङ्गवचनविपरिणामेनान्वयः ॥ १७ ॥

अर्थ—अबलाजनोंकी अत्यन्त मनोहर चालको हंसोंने जीतलिया, खिले हुए कमलोंने चन्द्रवदनकी कान्तिको छीन लिया और नीले कमलोंने मदसे घूमते हुए नेत्रोंको जीत लिया, एवं नदियोंकी सूक्ष्म सूक्ष्म तरंगोंने भ्रुकुटिविलासका जय कर लिया ॥ १७ ॥

श्यामा लताः कुसुमभारनतप्रवालाः
स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् ।
दन्तावभासविशदस्मितचन्द्रकान्ति
कङ्केलिपुष्परुचिरा नवमालती च ॥ १८ ॥

सं०टी०—श्यामा इति ॥ कुसुमानां पुष्पाणां भारेण नता नम्राः प्रवालाः पल्लवा यासां तास्तथोक्ताः श्यामा हरिद्वर्णास्तत्र मध्ये याश्च लता व्रतत्यः । " वल्ली तु व्रततिर्लता" इत्यमरः । स्त्रीणां नारीणां धृतानि भूषणानि यैस्तेषां बाहूनां कान्तिं शोभां हरन्त्यपनयन्ति । कङ्केलिपुष्परुचिरा नवमालती नूतनमालिका च दन्तानां रदनानामवभासने प्रभया विशदं निर्मलं स्मितमेव चन्द्रकान्तिम् । "रदना दशना दन्ताः " इत्यमरः । हरतीति विभक्तिविपरिणामेनान्वयः ॥ १८ ॥

अर्थ–पुष्पोंके भारसे नम्र हो रहे हैं नवीन पल्लव जिसके ऐसी श्यामालतास्त्रियोंके आभूषणोंसहित भुजाओंकी कान्तिको हर लेती हैं, और दुपहारियाके पुष्पोंसे अलंकृत हुई नवीन मालती दांतोंके प्रकाशसे स्वच्छ ऐसे मुसकुराते हुए मुखकी कान्तिको हरती हैं॥१८॥

केशान्नितान्तघननीलविकुञ्चिताग्रा-
नापूरयन्ति वनिता नवमालतीभिः।
कर्णेषु च प्रवरकाञ्चनकुड्मलेषु
नीलोत्पलानि विविधानि निवेशयन्ति॥ १९॥

सं०टी०–केशानिति॥ वनिता अबला नितान्तमत्यन्तं घनाः संकीर्णा नीलाः कृष्णवर्णा विकुञ्चिताः कुटिला अत एवाग्राः श्रेष्ठास्तांस्तथोक्तान्केशान्कुन्तलान् । "चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः" इत्यमरः । नवमालतीभिर्नवमालतीकुसुमैरापूरयन्ति । प्रवराणि श्रेष्ठानि काञ्चनकुड्मलानि स्वर्णताटङ्कादीनि येषु तेषु तथोक्तेषु कर्णेषु श्रवणेषु । "कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः।" इत्यमरः। विविधानि विचित्राणि नीलोत्पलानीन्दीवराणि निवेशयन्ति स्थापयन्ति । अवलम्बयन्तीत्यर्थः॥ १९॥

अर्थ–स्त्रियें अत्यन्त सटे हुए श्याम और घूंघुरवाले बालोंको नवीन मालतीके गुच्छोंसे सजाती हैं और जिनमें सुवर्णके कुण्डल चलायमान हैं ऐसे कानोंमें स्वच्छ कमल धारण करती हैं॥ १९॥

हारैः सचन्दनरसैः स्तनमण्डलानि
श्रोणीतटं सविपुलं रसनाकलापैः।
पादाम्बुजानि कलनूपुरशोभनैश्च
नार्यः प्रहृष्टमनसोऽद्य विभूषयन्ति॥ २०॥

सं०टी०–हारैरिति॥ प्रहृष्टमनसः प्रहर्षितचेतसो नार्यः स्त्रियोऽद्य सचन्दनरसैश्चन्दनद्रवसहितैर्हारैः स्तनमण्डलानि कुचमण्डलानि।

रसनाकलापैः काञ्चीगुणैः सुविपुलं महच्छ्रोणीतटं कटिपश्चाद्भागम् । कलनूपुरशेखरैरुत्तममञ्जीरैः पादाम्बुजानि चरणकमलानि च विभूषयन्तीत्यर्थः ॥ २० ॥

अर्थ–आजकल स्त्रियें अपने मनमें प्रसन्न होकर चन्दनके रसमें सने हुए हारोंसे गोल मटोल स्तनोंको सुशोभित करती हैं, अत्यन्त पुष्ट अत एव ऊंचे २ नितम्बोंको कौंदनी (कर्धनी) की जंजीरोंसे अलंकृत करती और सुन्दर २ पाजेबोंके घूंघुरुओंसे चरणारविन्दोंको विभूषित करती हैं ॥ २० ॥

स्फुटकुमुदचितानां राजहंसस्थितानां
मरकतमणिभासा वारिणा भूषितानाम् ।
श्रियमतिशयरूपां व्योम तोयाशयानां
वहति विगतमेघं चन्द्रतारावकीर्णम् ॥ २१ ॥

सं०टी०–स्फुटेति ॥ विगता मेघा यस्मात्तं तथोक्तं चन्द्रश्च तारा नक्षत्राणि च ताभिरवकीर्णं व्याप्तं व्योमाकाशं स्फुटैर्विकसितैः कुमुदैः कैरवैश्चिता व्याप्तास्तेषां तथोक्तानाम् । राजहंसा हंसविशेषाः स्थिता येषु तेषां तथोक्तानाम् । " राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः " इत्यमरः । मरकतमणेर्भा इव भाः कान्तिर्यस्य तेन तथोक्तेन वारिणा जलेन भूषितानां शोभितानां तोयाशयानां जलाशयानामतिशयरूपामत्यन्तसुन्दरां श्रियं शोभां वहति धत्त इत्यर्थः। मालिनीवृत्तम् । तल्लक्षणं तु पूर्वोक्तम् ॥ २१ ॥

अर्थ–खिले हुए बबूलोंसे युक्त, एवं जिसके कूलपर राजहंस[1] आश्रय कर रहे हैं, अथच मरकतमणीकी समान कान्तिमान् जलसे लबालेज भरे होनेके कारण अतीव सुन्दर सरोवरोंकी संपूर्ण शोभाको मेघहीन एवं चन्द्रमा और तारागणोंसे व्याप्त हुआ आकाश धारण करता है ॥ २१ ॥

---

१ जिनका श्वेत वर्ण और चरण चोंच जिनकी लाल हो उनको राजहंस कहते हैं।

शरदि कुमुदसङ्गाद्वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषमम्भः श्यानपङ्का धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥ २२ ॥

सं०टी०–शरदीति ॥ शरदि शरत्काले कुमुदस्य कैरवस्य सङ्गात्संसर्गाच्छीताः शीतला वायवः पवना वान्ति वहन्ति । दिग्विभागा आशाप्रान्ताः । " दिशस्तु ककुभः काष्ठा आशाश्च " इत्यमरः । विगतानि जलदानां मेघानां वृन्दानि समूहा येभ्यस्ते तथोक्ता अत एव मनोज्ञाः सुन्दराः । अम्भो जलं विगतं विनष्टं कलुषं कालुष्यं यस्य तत्तथोक्तम् । निर्मलमित्यर्थः । धरित्री क्षितिः । " धरा धरित्री धरणिः क्षोणी ज्या काश्यपी क्षितिः " इत्यमरः । श्यानपङ्का शुष्कपङ्का । व्योमाकाशं विमला निर्मलाः किरणा मयूखा यस्य तादृशश्चन्द्रो यत्र तत्तथोक्तम् । " किरणोऽस्रमयूखांशु " इत्यमरः । ताराभिर्नक्षत्रैर्विचित्रं सुन्दरमित्यर्थः । " नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् " इत्यमरः ॥ २२ ॥

अर्थ–शरद ऋतुमें पुष्पोंका संपर्क होनेसे पवन शीतल होकर वहती है, मेघसमुदाय भिन्न हो जानेके कारण चोतर्फा दिशा आक भाग मनोहर हो गये हैं, जलका मैल दूर होकर निर्मल हो गया, भूमीके ऊपर धानोंके खेत पक गये, आकाश शीतल किरणोंवाले चन्द्रमा एवं तारागणोंसे चित्रित हो रहा है ॥२२ ॥

दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।
कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे
ह्रसितमिव वधूनां प्रोषितेषु प्रियेषु ॥ २३ ॥

सं०टी०–दिवसेति ॥ प्रभाते प्रातःकाले दिवसकरस्य सूर्यस्य मयूखैः किरणैर्बोध्यमानं विकाश्यमानमित्यर्थः ।" स्युः प्रभारुग्रु-

चिस्त्विड्भाभाश्छविद्युतिदीप्तयः " इत्यमरः । पङ्कजं कमलमद्येदानीं जृम्भते शोभते । कुमुदं कैरवमपि चन्द्रबिम्बेऽस्तमस्ताचलं गते प्राप्ते सति प्रोषितेषु विदेशगतेषु प्रियेषु कान्तेषु वधूनां रमणीनां हसितमिव लीयते । क्षीणं भवतीत्यर्थः ॥ २३ ॥

अर्थ-प्रातःकालके समय सूर्यनारायणकी किरणोंसे चैतन्य किया हुआ कमल श्रेष्ठ स्त्रियोंके मुखकी समान कान्तिको धारण करके खिलता है, जिस प्रकार पतिके परदेश चले जानेपर वधूजनोंके हास्य लय हो जाते हैं, इसी प्रकार चन्द्रमण्डलके अस्त हो जानेपर कुमुदभी मुरझाया जाता है ॥ २३ ॥

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु
क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।
अधररुचिरशोभां बन्धुजीवे प्रियाणां
पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥ २४ ॥

सं०टी०-असितेति ॥ पथिकजनः पान्थजन इदानीं शरत्काले प्रियाणां प्रेयसीनामसितानां कृष्णानां नयनानां नेत्राणां लक्ष्मीं शोभाम् । " कृष्णे नीलासितश्यामकालश्यामलमेचकाः " इत्यमरः । " लोचनं नयनं नेत्रम् " इत्यमरः । उत्पलेषु कमलेषु क्वणिता क्वणन्ती या कनककाञ्ची सुवर्णरशना तां मत्तहंसस्वनेषून्मत्तमरालशब्देष्वधरस्योष्ठस्य रुचिरा सुन्दरा या शोभा तां बन्धुजीवे बन्धूककुसुमे लक्षयित्वा दृष्ट्वा भ्रान्तचित्तः सन् रोदिति । रोदनं करोतीत्यर्थः ॥ २४ ॥

अर्थ-पथिकजन कमलोंमें अपनी पत्नीके नीले नेत्रोंकी शोभा, मदोन्मत्त हंसोंके शब्दोंमें छनाछन खनकती हुई सुवर्णकी मेखला और गुलदुपहरीके पुष्पोंमें लाल २ ओष्ठोंकी शोभाका भ्रम कर रोदन करते हैं ॥ २४ ॥

स्त्रीणां विहाय वदनेषु शशाङ्कलक्ष्मीं

कामं च हंसवचनं मणिनूपुरेषु ।
बन्धूककान्तिमधरेषु मनोहरेषु
कापि प्रयाति सुभगा शरदागमश्रीः ॥ २५॥

सं०टी०—स्त्रीणामिति ॥ सुभगा सुन्दरा या शरदागमस्य श्रीः शोभा । शशांकस्य चन्द्रस्य लक्ष्मीं शोभां स्त्रीणां सुन्दरीणां वदनेषु मुखेषु । कामं रमणीयं हंसवचनं मरालविरुतं च मणिनूपुरेषु मणिखचितमञ्जीरेषु । बन्धूकस्य बन्धूककुसुमस्य कान्तिं च मनोहरेषु सुन्दरेष्वधरेषु विहाय त्यक्त्वा क्वापि कुत्रचिदपि प्रयाति गच्छतीत्यर्थः । एतेन हेमन्तागमः सूचितः । वसन्ततिलकावृत्तम् ॥ २५ ॥

अर्थ—सुन्दरियोंके मुखमें चन्द्रमाकी शोभा रखकर चिकने चांदने गोरे मुखके हास्यमें घने कमलोंकी शोभा सौंपके, और मनके हरनेवाले ओष्ठोंमें दुपहरीके पुष्पोंकी कान्ति धरकर न जाने यह शरद ऋतुकी शोभा कहां जाती है ॥ २५ ॥

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो वसाना ।
कुमुदरुचिरकान्तिः कामिनीवोन्मदेयं
प्रतिदिशतु शरद्भश्चेतसः प्रीतिमग्र्याम् ॥ २६ ॥

सं०टी०—विकचेति ॥ विकचं विकसितं कमलमेव वक्त्रं मुखं यस्याः सा तथोक्ता । पक्षे विकचं कमलमिव वक्त्रं यस्याः सेति । फुल्लानि प्रफुल्लानि नीलोत्पलानीन्दीवराण्येवाक्षिणी यस्याः सा तथोक्ता । पक्षे फुल्लानि नीलोत्पलानीवाक्षिणी यस्याः सेति । विकसितं विकाशं प्राप्तं नवकाशं नूतनं काशकुसुममेव श्वेतवासः श्वेतवस्त्रम् । पक्षे विकसितनवकाशमिव श्वेतवासो वसाना । कुमुदेन कैरवेण सदृशी रुचिरा कान्तिर्यस्याः सा तथोक्ता । पक्षे कुमुदमिव

रुचिरा कान्तिर्यस्याः सेयं शरदुन्मदोत्कटमदा कामिनीव प्रेयसीव वो युष्माकं चेतसश्चित्तस्याभ्यामुत्तमां प्रीतिं प्रतिदिशतु ददात्वित्यर्थः। मालिनीवृत्तमेतत् ॥ २६ ॥

इति भारद्वाजगोत्रोत्पन्नमणिरामविरचितया चन्द्रिकाख्यया व्याख्यया समेतः कविश्रीकालिदासकविवराग्रणीकृतावृतुसंहारे महाकाव्ये शरद्वर्णनं नाम तृतीयः सर्गः ॥ ३ ॥

अर्थ-खिले हुए कमल जिसका मुख हैं, प्रफुल्लित हुए नीले कमल जिसके नेत्र हैं, फुली हुई नवीन कासके सुन्दर वस्त्रवाली, एवं श्वेतकमलोंसे साक्षात् हँसती हुईसी यह शरदृतु चढती उमरकी उन्मत्त कामिनीकी समान तुम्हारे चित्तमें अत्यन्त प्रीतिकी वृद्धि करे ॥ २६ ॥

इति श्रीव्रजरत्नभट्टाचार्यकृतौ कामिनीसमाख्यायां भाषाव्याख्यायां शरद्वर्णनं नाम तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः।

नवप्रवालोद्गमसस्यरम्यः
प्रफुल्ललोध्रः परिपक्वशालिः।
विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतोऽयम् ॥ १ ॥

सं०टी०-नवेति ॥ नवानां नूतनानां प्रवालानां पल्लवानामुद्गम उत्पत्तिः सस्यानि च तै रम्यो रमणीयः। प्रफुल्लाः संफुल्ला लोध्रा लोध्रवृक्षा यस्मिन्स तथोक्तः। परिपक्वाः परिणताः शालयो धान्यानि यस्मिन्स तथोक्तः। विलीनानि म्लानानि पद्मानि कमलानि यस्मिन्स तथोक्तः। प्रपतत्तुषारो हिमं यस्मिन्स तथोक्तः। "तुषारस्तुहिनं

हिमम् " इत्यमरः । अयं हेमन्तकालः समुपागत आगतः । प्राप्त इत्यर्थः। उपेन्द्रवज्रावृत्तम्। तल्लक्षणं तु–" उपेन्द्रवज्रा जतजास्ततो गौ " इति ॥ १ ॥

अर्थ–हे प्रिये! नवीन अंकुरों और पुष्पोंसे रमणीय, लोध्र वृक्षको प्रफुल्लित करता और धानोंके खेतको पकानेवाला, एवं पालेकी वर्षा करनेवाला अत एव कमलोंको नाश करनेवाला यह हेमन्तसमय आगया ॥ १ ॥

मनोहरैः कुङ्कुमरागरक्तै-
स्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीना-
मलंक्रियन्ते स्तनमण्डलानि ॥ २ ॥

सं०टी०–मनोहरैरिति ॥ स्तनैः कुचैः शालन्ते शोभन्त इति स्तनशालिन्यस्तासां तथोक्तानां विलासिनीनां विलासवतीनां स्तनमण्डलानि कुचमण्डलानि मनोहरैः कुङ्कुमस्य कश्मीरजन्मनो रागेण रक्ताः पिञ्जरास्तैस्तथोक्तैः । "अथ कुङ्कुमम् । कश्मीरजन्माग्निशिखं बरं बाह्लीकपीतने " इत्यमरः । तुषारो हिमम्, कुन्दः कुन्दकुसुमम्, इन्दुश्चन्द्रस्तैर्निभाः सदृशास्तैस्तथोक्तैर्हारैर्मुक्ताहारैरलंक्रियन्त इत्यर्थः ॥ २ ॥

अर्थ–हेमन्तऋतुमें घिसे हुए चन्दनके लगानेसे गौर वर्णवाले, बरफ कुन्द और चन्द्रमाकी समान स्वच्छ अत एव मनोहर हारोंसे घने उरोजोंवाली स्त्रियोंके गोल मटोल पुष्ट स्तन अलंकृत नहीं किये जाते अर्थात् हेमन्तऋतुमें स्त्रियें अपने उरोजोंके ऊपर हार धारण नहीं करतीं ॥ २ ॥

न बाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि ।

नितम्बबिम्बेषु नवं दुकूलं
तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥

सं०टी०-नेति ॥ विलासिनीनां बाहुयुग्मेषु करयुगेषु वलयानि कटकान्यङ्गदानि केयूराणि तानि । "कटको वलयोऽस्त्रियाम्" इत्यमरः। "केयूरमङ्गदं तुल्ये" इत्यपि। सङ्गं संबन्धं न प्रयान्ति न प्राप्नुवन्ति । नवं नूतनं दुकूलं वस्त्रं नितम्बबिम्बेषु कटिपश्चाद्भागेषु सङ्गं न प्रयाति । तनु सूक्ष्ममंशुकं वस्त्रं कञ्चुक्यादि पीनाः परिपुष्टा ये पयोधराः कुचास्तेषु सङ्गं न प्रयातीति वचनविपरिणामेनान्वयः ॥ ३ ॥

अर्थ-रतिक्रीडामें निपुण रमणियोंकी दोनों भुजाओंमें कंगन और बाजूबन्द नहीं हैं अर्थात् शीतल लगनेके कारण स्त्रियोंने कंकण और बाजूबन्द उतार धरे हैं, नितम्बदेशमें नवीन वस्त्र एवं पुष्ट कुचमण्डलमें झीने पटकी चोलीभी नहीं है अर्थात् पुराने और गाढे वस्त्र धारण किये हैं ॥ ३ ॥

काञ्चीगुणैः काञ्चनरत्नचित्रै-
र्नो भूषयन्ति प्रमदा नितम्बम्।
न नूपुरैर्हंसरुतं भजद्भिः
पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ४ ॥

सं०टी०-काञ्चीति ॥ प्रमदाः स्त्रियो नितम्बं काञ्चनं स्वर्णं रत्नानि च तैश्चित्रैश्चमत्कृतैः काञ्चीगुणै रशनाकलापैर्नो भूषयन्ति नालंकुर्वन्ति । तथाम्बुजस्य कमलस्य कान्तिं भजन्ति तानि तथोक्तानि पादाम्बुजानि चरणकमलानि हंसरुतं मरालविरुतं भजद्भिर्नूपुरैर्मञ्जीरैर्न भूषयन्ति । उपजातिवृत्तमेतत् । तल्लक्षणं तु-"स्यादिन्द्रवज्रा यदि तौ जगौ गः । उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥" इति ॥ ४ ॥

अर्थ–स्त्रियें अपने २ नितम्बोंको सुवर्ण एवं रत्नजटित तगडी-की जंजीरसे विभूषित नहीं करतीं, और हंसोंके शब्दका अनुकरण करनेवाले नूपुरोंसे कमलकी समान सुन्दर कान्तिवाले चरणोंकोभी अलंकृत नहीं करती हैं ॥ ४ ॥

गात्राणि कालीयकचर्चितानि
सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि
कुर्वन्ति नार्यः सुरतोत्सवाय ॥ ५ ॥

सं०टी०–गात्राणीति ॥ नार्यः स्त्रियः सुरतोत्सवाय गात्राणि शरीराणि कालीयकेन जायकेन चर्चितानि लिप्तानि । "अथ जायकम्। कालीयकं च कालानुसार्यम्" इत्यमरः। मुखाम्बुजानि वदनकमलानि पत्रलेखा पत्राङ्गुलिः कपाले कस्तूरिकापत्रावली तया सहितानि युक्तानि। "पत्रलेखा पत्राङ्गुलिरिमे समे" इत्यमरः। शिरांसि कालागुरुणा धूपितानि संजातधूपानि सुगन्धान्वितानि कुर्वन्तीत्यर्थः ॥५॥

अर्थ–कामिनियें कामक्रीडा करनेके तईं अपने गात्रोंको दारु हलदी (अथवा गोपीचंदन) से लिप्त करती हैं, अपने मुखारविन्दके ऊपर विविध भांतिकी पत्ररचना करती हैं, एवं शिरको काले अगरकी सुगन्धिसे सुवासित करती हैं ॥ ५ ॥

रतिश्रमक्षामविपाण्डुवक्त्राः
संप्राप्तहर्षाभ्युदयास्तरुण्यः ।
हसन्ति नोच्चैर्दशनाग्रभिन्ना-
न्प्रपीड्यमानानधरानवेक्ष्य ॥ ६ ॥

सं०टी०–रतीति ॥ रतिश्रमेण सुरतश्रमेण क्षामं कृशं विपाण्डु विपाण्डुवर्णं वक्त्रं यासां तास्तथोक्ताः । संप्राप्तो हर्षस्यानन्दस्याभ्युदयो याभिस्तास्तथोक्तास्तरुण्यः कामिन्यो दशनानां रदनाना-

मग्रैरग्रभागैर्भिन्नाः क्षतास्तथोक्तानत एव प्रपीड्यमानानधरानोष्ठानवेक्ष्य दृष्ट्वोच्चैरुच्चैःस्वरेण न हसन्ति हास्यं न कुर्वन्तीत्यर्थः। उच्चैर्हसन्ति तेऽधिकं पीड्यन्त इति भावः ॥ ६ ॥

अर्थ-अपने पतिके संग रति करनेके परिश्रमसे जिनके मुख क्षीण होकर श्वेत हो गये हैं ऐसी तरुणियें आनन्द प्राप्त होनेपर भी अपने रक्त ओष्ठोंको पतिके दन्ताघातसे क्षत हुए देख अट्टहास हास्य नहीं करतीं ॥ ६ ॥

पीनस्तनोरःस्थलभागशोभा-
मासाद्य तत्पीडनजातखेदः।
तृणाग्रलग्नैस्तुहिनैः पतद्भि-
राक्रन्दतीवोषसि शीतकालः ॥ ७ ॥

सं०टी०-पीनेति॥ पीनौ पुष्टौ स्तनौ यत्र तादृशो य उरःस्थलभागस्तस्य शोभामासाद्य प्राप्य तत्पीडनेन जातः संजातः खेदो दुःखं यस्य स तथोक्तः शीतकालः पतद्भिः प्रपतद्भिरत एव तृणाग्रे तृणप्रान्ते लग्नानि संलग्नानि तैस्तथोक्तैस्तुहिनैस्तुषारैरुषासि प्रभात आक्रन्दतीवेत्युत्प्रेक्षा ॥ ७ ॥

अर्थ-मोटे २ उरोजोंवाले वक्षस्थलमें अत्यन्त शोभाको प्राप्त हो, तदनन्तर कुचमर्दन होनेसे खेदको प्राप्त होता हुआ यह शीतकाल प्रातःकालमें घासके अग्रभागमें लगे हुए ओसके कणोंके द्वारा मानो सचमुच रोदनही कर रहा है ॥ ७ ॥

प्रभूतशालिप्रसवैश्चितानि
मृगाङ्गनायूथविभूषितानि।
मनोहरक्रौञ्चनिनादितानि
सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥

सं०टी०-प्रभूतेति ॥ प्रभूताः संभूता ये शालिप्रसवा धान्यानि

तैश्चितानि व्याप्तानि । मृगाङ्गनानां हरिणरमणीनां यूथैः समुदायैर्विभूषितानि शोभितानि । मनोहराः सुन्दरा ये क्रौञ्चाः पक्षिविशेषास्तैर्निनादितानि प्रतिनादितानि सीमान्तराणि सीम्नां प्रान्तभागाश्चेतः । अन्तस्येति शेषः । उत्सुकयन्त्युत्कण्ठयन्तीत्यर्थः ॥ ८ ॥

अर्थ–धानोंकी बालोंसे खूब भरी पुरी, हरिणियोंके झुण्डके झुण्डसे विभूषित एवं मनको हर लेनेवाले क्रौंचपक्षियोंके शब्दोंसे शब्दायमान ऐसे नगरकी सीमाओंके प्रान्तभाग चित्तको उत्कण्ठित करते हैं ॥ ८ ॥

प्रफुल्लनीलोत्पलशोभितानि
सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सुशीतलानि
सरांसि चेतांसि हरन्ति पुंसाम् ॥ ९ ॥

सं०टी०–प्रफुल्लेति ॥ प्रफुल्लैरुत्फुल्लैर्नीलोत्पलैरिन्दीवरैः शोभितानि भूषितानि । सोन्मादैरुन्मादसहितैः कादम्बैः कलहंसैर्विभूषितानि । प्रसन्नं निर्मलं तोयं जलं येषु तानि तथोक्तानि । सुशीतलानि सरांसि सरोवराणि पुंसां पुरुषाणां चेतांस्यन्तःकरणानि हरन्तीत्यर्थः ॥ ९ ॥

अर्थ–खिले हुए नीले २ कमलोंसे सुशोभित, सिवारसमन्वित, निर्मल जलवाले ऐसे सरोवर बदक आदि पक्षियों द्वारा जलका फैलाव विशेष हो जानेपर युवा पुरुषोंके चित्तको हर लेते हैं ॥ ९ ॥

मार्गं समीक्ष्यातिनिरस्तनीर
प्रवासखिन्नं पतिमुद्वहन्त्यः ।
प्रवेक्ष्यमाणा हरिणेक्षणाक्ष्यः
प्रबोधयन्तीव मनोरथानि ॥ १० ॥

अर्थ–मार्गका जल बिलकुल शुष्क हुआ देख, पतिके विदेश

चले जानेसे उनके वियोगजनित खेदको धारण करती अथच हरिणियोंकी सदृश बडे २ नेत्रवाली स्त्रियें पतिकी वाट जोहती २ मानो अपने मनोरथोंको प्रबुद्ध करती हैं ॥ १० ॥

पाकं व्रजन्ती हिमजातशीतै-
राधूयमाना सततं मरुद्भिः ।
प्रिये प्रियङ्गुः प्रियाविप्रयुक्ता
विपाण्डुतां याति विलासिनीव ॥ ११ ॥

सं०टी०–पाकमिति ॥ हे प्रिये ! हिमेन तुषारेण जातैः संजातैः शीतैः पाकं परिपाकं व्रजन्ती गच्छन्ती मरुद्भिर्वायुभिः सततं निरन्तरमाधूयमाना कम्पायमाना प्रियङ्गुर्गोवन्दिनी लता । "श्यामा तु महिलाह्वया । लता गोवन्दिनी गुन्द्रा प्रियङ्गुः फलिनी फली " इत्यमरः । प्रियेण कान्तेन विप्रयुक्ता विलासिनीव स्त्रीव । विपाण्डुतां विशेषेण पाण्डुतां याति । गच्छतीत्यर्थः ॥ ११ ॥

अर्थ–देखो प्रिये ! पालेका संसर्ग होनेके कारण अत्यन्त शीतल ऐसी पवनके लगनेसे निरन्तर कम्पित होनेवाली, अथच परिपाकको प्राप्त होती हुई यह प्रियंगु अपने प्रियपतिसे वियोगको प्राप्त हुई (वियोगिनी) स्त्रीकी समान श्वेत वर्णको प्राप्त होती है ॥ ११ ॥

पुष्पासवामोदिसुगन्धिवक्त्रो
निःश्वासवातैः सुरभीकृताङ्गः ।
परस्पराङ्गव्यतिरिक्तशायी
शेते जनः कामरसानुविद्धः ॥ १२ ॥

सं०टी०–पुष्पेति ॥ पुष्पासवस्य पुष्पनिर्गतासवस्य पुष्पयुक्तासवस्य वामोदेन सौगन्धेन सुगन्धि सुरभि वक्त्रं वदनं यस्य स तथोक्तः । निःश्वासवातैः श्वासोच्छ्वासपवनैः सुरभीकृतमङ्गं शरीरं

यस्य स तथोक्तः । कामरसेन कंदर्पसेनानुविद्धो व्याप्तोऽत एव परस्परस्यान्योन्यस्याङ्गेन व्यतिरिक्तं संलग्नमिति तथा शेते स तथोक्तो जनो लोकः शेते निद्रातीत्यर्थः ॥ १२ ॥

अर्थ–जिनके मुख पुष्पोंके आसवकी सुगन्धिसे सुवासित हो रहे हैं, तथा श्वासकी वायुके लगनेसे जिनके शरीर महक रहे हैं ऐसे कामी पुरुष कामदेवके बाणोंसे विद्ध होकर आपसमें शरीरोंको अतिशय सटाकर शयन करते हैं ॥ १२ ॥

दन्तच्छदैः सव्रणदन्तचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां
रतोपयोगो नवयौवनानाम् ॥ १३ ॥

सं०टी०–दन्तच्छदैरिति॥नवं नूतनं यौवनं तारुण्यं यासां तासां तथोक्तानामङ्गनानां वनितानां सव्रणानि सक्षतानि दन्तानां रदनानां चिह्नानि लक्ष्माणि येषु तैस्तथोक्तैः । " चिह्नं लक्ष्म च लक्षणम् " इत्यमरः । दन्तच्छदैरधरैः पाण्यग्रैर्नखैः कृतोऽभिलेखो लेखनं येषु तैस्तथोक्तैः । स्तनैः कुचैश्च निर्दयं दयारहितं यथा भवति तथा रतोपयोगः संभोगावाप्तिः संसूच्यते सम्यग्ज्ञाप्यत इत्यर्थः ॥ १३ ॥

अर्थ–दांतोंके काटनेके चिन्होंसे युक्त हुए ओष्ठों, और नखोंके चिह्नसे चिह्नित हुए स्तनोंके देखनेसे, नवीन यौवनवती स्त्रियोंका रतिके समय निर्दयतासे भोगा जाना प्रगट होता है ॥ १३ ॥

काचिद्विभूषयति दर्पणसक्तहस्ता
बालातपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं
दन्ताग्रभिन्नमवकृष्य निरीक्षते च ॥ १४ ॥

सं०टी०—काचिदिति॥ दर्पण आदर्शे सक्तः संसक्तो हस्तः करो यस्याः सा तथोक्ता। "दर्पणे मुकुरादर्शौ" इत्यमरः। काचिद्वनिता स्त्री बालातपेषु कोमलोष्णेषु। स्थित्वेति शेषः। वदनारविन्दं मुखकमलं विभूषयत्यलंकरोतीत्यर्थः। किंच। प्रियतमेन कान्तेन निपीतः सारो रसो यस्य तं तथोक्तं दन्ताग्रै रदनाग्रैर्भिन्नः खण्डितस्तथोक्तो दन्तच्छदमोष्ठमवकृष्याकृष्य निरीक्षतेऽवलोकयतीत्यर्थः। वसन्ततिलकावृत्तमेतत्। लक्षणं तु पूर्वमुक्तम्॥ १४॥

अर्थ—कोई स्त्री हाथमें दर्पण लेकर नवीन उदित हुए सूर्यकी घाममें बैठके अपने मुखकमलको भलीप्रकार विभूषित करती है और प्रियपतिने अधरामृत पान कर लिया है अत एव उसके दन्ताघातसे क्षत हुए ओष्ठोंको वार २ हटाके देखती है॥ १४॥

अन्या प्रकामसुरतश्रमखिन्नदेहा
रात्रिप्रजागरविपाटलनेत्रपद्मा।
स्रस्तांसदेशलुलिताकुलकेशपाशा
निद्रां प्रयाति मृदुसूर्यकराभितप्ता॥ १५॥

सं०टी०—अन्येति॥ प्रकाममत्यन्तं सुरतश्रमेण संभोगक्लेशेन खिन्नः खेदान्वितो देहः शरीरं यस्याः सा तथोक्ता। रात्रौ निशायां यः प्रजागरो जागरणं तेन विपाटले विशेषेण पाटलवर्णे नेत्रपद्मे नयनारविन्दे यस्याः सा तथोक्ता। स्रस्तो विसकलितोंऽसदेशो स्कन्धप्रदेशो लुलितोऽत्यन्तमाकुलो व्याकुलः केशपाशो कबरीबन्धो यस्याः सा तथोक्ता। मृदुभिः कोमलैः सूर्यकरैस्तरणिकिरणैरभितप्तान्या काचित्स्त्री निद्रां प्रयाति प्राप्नोति॥ १५॥

अर्थ—रतिक्रीडाके समय अत्यन्त परिश्रम करनेके कारण शिथिल देहवाली, अत एव रात्रीके समय जागनेसे जिनके नेत्रकमल लाल २ हो गये हैं, एवम् सेजकी पट्टियोंमें उलझकर जिनके केशपाश बिखर गये हैं ऐसी अन्य स्त्रियें भोरके सूर्यकी सुहाती २ किरणोंसे भड़कको प्राप्त हो शयनही कर रही हैं॥ १५॥

निर्माल्यदाम परिमुक्तमनोज्ञगन्धं
मूर्ध्नोऽपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरास्तरुण्यः ॥ १६ ॥

सं०टी०–निर्माल्येति ॥ घनवन्मेघवद्घनाः संकीर्णा वा नीलाः कृष्णवर्णाः शिरोरुहान्ताः केशप्रान्ता यासां तास्तथोक्ताः । पीनाः पुष्टा उन्नताश्च ये स्तनाः कुचास्तेषां भरेण भारेण नता नम्रा गात्रयष्ट्यः शरीरलता यासां तास्तथोक्ता अपरा अन्यास्तरुण्यो युवत्यः परिमुक्तस्त्यक्तो मनोज्ञः सुन्दरो गन्धो येन तत्तथोक्तम् । निर्माल्यदाम निर्माल्यभूतां स्रजं मूर्ध्नः शिरसोऽपनीय दूरीकृत्य केशानां कुन्तलानां रचनां कुर्वन्ति ॥ १६ ॥

अर्थ–जिनके शिरके बाल अत्यन्त घने और नीले हैं, जिनकी शरीरयष्टी पुष्ट और उन्नत कुचोंके भारसे नम्र हैं ऐसी अन्य स्त्रियें मस्तकके ऊपरसे उतारके मालारहित सूत्रकी मनोहर सुगन्धिको सूंघकर केशरचना करती हैं ॥ १६ ॥

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरचारुशोभा ।
कूर्पासकं परिदधाति नखक्षताङ्गी
व्यालम्बिनीललुलितालककुञ्चिताक्षी॥१७॥

सं०टी०–अन्येति ॥ प्रियेण कान्तेन परिभुक्तं संभुक्तं गात्रं शरीरमवेक्ष्य दृष्ट्वा हर्षेणानन्देनान्विता युक्ता । विरचिता कृताधर ओष्ठे चारुशोभा नखकृतरेखया दन्तक्षतैर्वा यस्याः सा तथोक्ता । नखैर्नखरैः क्षतं कारितमङ्गं शरीरं यस्याः सा तथोक्ता । व्यालम्बिनीभिर्लम्बद्भिर्नीलवर्णैर्ललितैः सुन्दरैरलकैः कुन्तलैः कुञ्चिते आकुञ्चिते अक्षिणी यस्याः सा तथोक्तान्या स्त्री कूर्पासकं चोलम् । "चोलः कूर्पासकोऽस्त्रियाम्" इत्यमरः । परिदधाति धत्त इत्यर्थः १७

अर्थ-मनोहर अलक और तिरछी चितवनवाली छैरी अन्य स्त्रियें अपने शरीरको प्रियपतिसे उपभुक्त हुआ देख अत एव प्रसन्न होकर अधर और गण्डस्थलकी शोभाकी रचना करके नवीन लाल वस्त्र धारण करती हैं ॥ १७ ॥

अन्याश्चिरं सुरतकेलिपरिश्रमेण
खेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः ।
संहृष्यमाणपुलकोरुपयोधरान्ता
अभ्यञ्जनं विदधति प्रमदाः सुशोभाः॥१८॥

सं०टी०-अन्या इति॥चिरं चिरकालं या सुरतकेलिः संभोगक्रिया तया यः परिश्रमः क्लेशस्तेन खेदं गताः प्राप्ता अत एव प्रकर्षेण शिथिलीकृता गात्रयष्ट्यो यासां तास्तथोक्ताः । संहृष्यमाणः पुलको रोमाञ्चो यस्मिंस्तादृश ऊरुः पीनश्च पयोधरान्तः पयोधरप्रान्तो यासां तास्तथोक्ताः । सुष्ठु समीचीना शोभा यासां तास्तथोक्ताः । अन्याः प्रमदाः स्त्रियोऽभ्यञ्जनमभ्यङ्गं सुगन्धतैलादिना विदधति कुर्वन्तीत्यर्थः ॥ १८ ॥

अर्थ-रतिक्रीडाके समय अत्यन्त परिश्रमसे चिरकालपर्यंत खेदको प्राप्त हुई, अत एव जिनके शरीर शिथिल हो गये हैं, अथच मोटी २ जंघा और स्तनोंके मर्दन करनेसे खदको प्राप्त हुई सुन्दर अन्य स्त्रियें (तैलादिकोंसे) देहको विमर्दित करती हैं ॥ १८ ॥

बहुगुणरमणीयो योषितां चित्तहारी
परिणतबहुशालिव्याकुलग्रामसीमा ।
सततमतिमनोज्ञः क्रौञ्चमालापरीतः
प्रदिशतु हिमयुक्तः काल एषः सुखं वः॥१९॥

सं०टी०-बहुगुणेति ॥ बहुगुणै रमणीयः सुन्दरो योषितां स्त्रीणां चित्तहारी मनोहारी परिणतैः परिपक्वैर्बहुभिः शालिभि-

व्याकुला ग्रामसीमा ग्रामान्ताः प्रान्ता यस्मिन्स तथोक्तः । सततं निरन्तरमतिमनोज्ञोऽतिसुन्दरः क्रौञ्चमालाभिः क्रौञ्चपङ्क्तिभिः परीतो युक्तो हिमयुक्तो एष कालो हेमन्तकालो वः सुखं प्रदिशतु ददात्वित्यर्थः ॥ १९ ॥

इति भारद्वाजगोत्रोत्पन्नमणिरामविरचितया चन्द्रिकाख्यया व्याख्यया समेतः कविश्रीकालिदासकविवराग्रणीकृतावृतुसंहारे महाकाव्ये हेमन्तवर्णनं नाम चतुर्थः सर्गः ॥ ४ ॥

अर्थ–विविध प्रकारके गुणोंसे रमणीय, स्त्रियोंका चितचोर, परिपक्व हुए धानोंसे ग्रामकी सीमाओंको व्याप्त करनेवाला, क्रौंचपक्षियोंके शब्दसे शब्दायमान तथा पालेकी बूंदें टपकानेवाला अत एव बरफसहित यह हेमन्त काल तुम्हारे मनोरथकी सिद्धि करे ॥ १९ ॥

इति श्रीव्रजरत्नभट्टाचार्यकृतौ कामिनी समाख्यायां भाषाव्याख्यायां हेमन्तवर्णनं नाम चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ।

प्ररूढशाल्यंशुचयैर्मनोहरं
क्वचित्स्थितक्रौञ्चनिनादराजितम् ।
प्रकामकामं प्रमदाजनप्रियं
वरोरु कालं शिशिराह्वयं शृणु ॥ १ ॥

सं०टी०–अथ क्रमप्राप्तं शिशिरं वर्णयति–प्ररूढेति ॥ वरावुत्कृष्टावूरू जङ्घे यस्यास्तस्याः संबोधने हे वरोरु, प्ररूढानां प्रवृद्धानां शालीनामंशुचयैर्मनोहरम् । क्वचित्पुस्तके "प्ररूढशालीक्षुचयावृतक्षितिम् " इति पाठः । स तु रूढ एव । तत्र प्ररूढानां प्रवृद्धानां शालीनां धान्यानामीक्षूणां च चयैः समूहैरावृताच्छादिता क्षितिः पृथ्वी यस्मिन्निति समासः । क्वचित्कुत्राचिद्वृक्षशाखायां स्थितानां-

मुपविष्टानां क्रौञ्चानां पक्षिविशेषाणां निनादैर्विरुतै राजितं शोभितं तं तथोक्तम् । प्रकाममत्यन्तं कामो यस्मिंस्तं तथोक्तम् । प्रमदाजनस्य स्त्रीजनस्य प्रियमिष्टं शिशिर इत्याह्वाख्या यस्य तं तथोक्तं कालं समयं शृण्वाकर्णयेत्यर्थः । वंशस्थवृत्तमेतत् । तल्लक्षणं तु पूर्वमुक्तम् ॥ १ ॥

अर्थ-हे सुन्दर जंघाओंवाली ! अब तु अत्यन्त कमनीय अत एव स्त्रियोंको परम प्यारी शिशिर ऋतुका वर्णन सुन ! इस ऋतुमें भूमिभाग वृद्धिको प्राप्त हुए धान, इक्षु (गन्ने) के समूहसे व्याप्त हो जाते हैं, और क्रौंचपक्षी अच्छी तरह बैठकर सुन्दर शब्द करने लगते हैं ॥ १ ॥

निरुद्धवातायनमन्दिरोदरं
हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः ॥
प्रयान्ति कालेऽत्र जनस्य सेव्यताम् ॥ २ ॥

सं०टी०-निरुद्धेति ॥ अत्र काले शिशिरकाले निरुद्धान्यवरुद्धानि वातायनानि गवाक्षा यस्य तादृशस्य मन्दिरस्योदरं गर्भदेशः। "वातायनं गवाक्षः स्यात् " इत्यमरः । हुताशनोऽग्निर्भानुमतः सूर्यस्य गभस्तयः किरणाः । गुरूणि वासांसि च वस्त्राणि । सयौवनास्तारुण्यसहिता अबलाः स्त्रियो जनस्य लोकस्य सेव्यतां प्रयान्ति प्राप्नुवन्तीति वचनविपरिणामेनान्वयः ॥ २ ॥

अर्थ-सींकचोंसे बन्द हुए घरके भीतर सूर्यकी किरणें और अग्नि, बडे २ वस्त्र एवं यौवनवती स्त्रियें शिशिर ऋतुमें मनुष्योंके सेव्य होती हैं ॥ २ ॥

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।

न वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति सांप्रतम् ॥ ३ ॥

सं०टी०–नेति ॥ सांप्रतमिदानीं चन्द्रमरीचय इव चन्द्ररश्मय इव शीतलं शिशिरं चन्दनं जनस्य चित्तं न रमयति । तथा शरदिन्दुवन्निर्मलं स्वच्छं हर्म्यपृष्ठं प्रासादतलं जनस्य चित्तं न रमयति। तथा सान्द्रेण घनेन तुषारेण हिमेन शीतलाः शिशिरा वायवः पवनाः अपि जनस्य चित्तं न रमयन्तीत्यर्थः ॥ ३ ॥

अर्थ–अब शिशिर ऋतुमें चन्द्रमाकी किरणोंकी समान शीतल चन्दन, शरद ऋतुके चन्द्रमाकी चांदनीसे निर्मल महलोंकी छत्तें और घने तुषारके सहवाससे अति शीतल हुई वायु यह मनुष्योंके चित्तको प्रसन्न नहीं करते ॥ ३ ॥

तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुतारागणजिह्मभूषिता
जनस्य सेव्या न भवन्ति रात्रयः ॥ ४ ॥

सं०टी०–तुषारेति ॥ तुषारसंघातस्य हिमसमूहस्य निपातेन शीतलाः । पुनः शशाङ्कस्य चन्द्रस्य भाः कान्तयस्ताभिः शिशिरीकृताः । एतेन शैत्याधिक्यं सूचितम् । विपाण्डुना पाण्डुरवर्णेन तारागणेन नक्षत्रसमूहेन जिह्मं वक्रं यथा भवति तथा भूषिताः शोभिता रात्रयः शर्वर्यो जनस्य लोकस्य सेव्याः सेवितुमुपभोक्तुं योग्या न भवन्तीत्यर्थः ॥ ४ ॥

अर्थ–पालेके अत्यन्त गिरनेसे अतीव शीतल, फिर चन्द्रमाकी चांदनीसे औरभी शीतल हुई, तथा श्वेततारागणरूप स्वच्छ आभूषण धारण करनेवाली रात्रियें मनुष्योंकी सेव्य नहीं होती अर्थात् शिशिर ऋतुमें रात्रीके समय मनुष्य नहीं विचरते ॥ ४ ॥

गृहीतताम्बूलविलेपनस्रजः
सुखासवामोदितवक्त्रपङ्कजाः ।
प्रकामकालागुरुधूपवासितं
विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ॥ ५ ॥

सं०टी०—गृहीतेति ॥ गृहीतास्ताम्बूलं च विलेपनं च कस्तूर्यादि स्रजः कुसुममालाश्च याभिस्तास्तथोक्ताः । सुखयतीति सुखः सुखकरो य आसवो मधु तेनामोदितं सुगन्धितं वक्त्रपङ्कजं मुखकमलं यासां तास्तथोक्ताः । उत्सुका उत्कण्ठिताः स्त्रियः प्रकाममत्यन्तं कालागुरोः कृष्णागुरोर्धूपेन वासितं शय्यागृहं शय्यामन्दिरं विशन्ति प्रविशन्तीत्यर्थः ॥ ५ ॥

अर्थ—तांबूल (पान) विलेपन (तैल आदि लेप) और माला धारण करनेवाली तथा पुष्पोंके आसवकी सुगन्धिसे जिनके मुखकमल महक रहे हैं, ऐसी स्त्रियें अत्यन्त उत्कण्ठित होकर काले अगर और धूपसे सुवासित हुए शयनागारमें प्रवेश करती हैं ॥५॥

कृतापराधान्बहुशोऽपि तर्जिता-
न्सवेपथून्साध्वसलुप्तचेतसः ।
निरीक्ष्य भर्तॄन्सुरताभिलाषिणः
स्त्रियोऽपराधान्समदा विसस्मरुः ॥ ६ ॥

सं०टी०—कृतापराधानिति ॥ समदा मदसहिताः स्त्रियः कामिन्यः कृतोऽपराधो यैस्तथोक्तानत एव बहुशो बहुवारमपि तर्जितान्वेपथुभिः कम्पैः सहिता युक्तास्तांस्तथोक्तान् । साध्वसं भयम् । "साध्वसं भयम्" इत्यमरः । पूर्वकृतापराधमूलकं तेन लुप्तं विनष्टं चेताश्चित्तं येषां ते तथोक्तान्भर्तॄन्प्रियान्सुरताभिलाषिणः संभोगाभिलाषिणो निरीक्ष्य वीक्ष्य कृतापराधानपराधकृतान्विसस्मरुरित्यर्थः । वंशस्थवृत्तमेतत् । तल्लक्षणं तूक्तम् ॥ ६ ॥

अर्थ–मदोन्मत्त अत एव रतिके विलासकी इच्छा करनेवाली रमणियें (परस्त्रीगमन आदि) अनेक अपराध करनेवाले अत एव बहुत प्रकारसे तिरस्कार किये हुए अथच (भयसे) कम्पित होनेवाले सुतरां मुग्ध चित्तवाले अपने स्वामियोंको देखकर उनके अपराधोंको भूल जाती हैं ॥ ६ ॥

प्रकामकामैर्युवभिः सनिर्दयं
निशासु दीर्घास्वभिरामिताश्चिरम् ।
भ्रमन्ति मन्दं श्रमखेदितोरसः
क्षपावसाने नवयौवनाः स्त्रियः ॥ ७ ॥

सं०टी०–प्रकामकामैरिति ॥ प्रकाममत्यन्तं कामोऽभिलाषो येषां तैस्तथोक्तैः । कामातुरैरित्यर्थः युवभिस्तरुणैर्दीर्घासु निशासु रात्रिषु चिरं चिरकालं निर्दयं निर्दयतया दयाभावेन सहितं यथा भवति तथाभिरामिताः क्रीडिताः । अत एव श्रमेण परिश्रमेण खेदितं खिन्नमुरो हृदयं यासां तास्तथोक्ता नवयौवनास्तरुण्यः स्त्रियः क्षपायाः क्षणदाया अवसानं समाप्तिस्तस्मिन् । प्रभात इत्यर्थः। मन्दं मन्थरं भ्रमन्ति भ्रमणं कुर्वन्तीत्यर्थः ॥ ७ ॥

अर्थ–कामदेवसे अत्यन्त व्याकुल हुए तरुण पुरुषोंद्वारा जाङोंकी बडी २ रात्रियोंमें चिरकालपर्यंत निर्दयतासे भोगी हुई तथा रातिसमयके परिश्रमसे जिनका हृदय अत्यन्त पीडित हो रहा है ऐसी नवीन यौवनवती कामिनियें रात बीत जानेपर शनैः २ चलती हैं॥७॥

मनोज्ञकूर्पासकपीडितस्तनाः
सरागकौशेयकभूषितोरसः ।
निवेशितान्तःकुसुमैः शिरोरुहै-
र्विभूषयन्तीव हिमागमं स्त्रियः ॥ ८ ॥

सं०टी०–मनोज्ञेति ॥ मनोज्ञेन सुन्दरेण कूर्पासकेन चोलेन पी-

डिताः स्तनाः यासां तास्तथोक्ताः। सरागं रागसहितं यत्कौशेय-मेव कौशेयकं कृमिकोशोत्थं वस्त्रं तेन विभूषितं शोभितमुरो हृदयं यासां तास्तथोक्ताः स्त्रियो निवेशितानि निविष्टान्यन्तरन्तर्भागे कुसुमानि येषां ते तैस्तथोक्तैः शिरोरुहैः केशैर्हिमागमं शीतकालं विभूषयन्तीवेत्युत्प्रेक्षा ॥ ८ ॥

अर्थ—रंगीन रेशमी वस्त्रसे जंघाओंको विभूषित करनेवाली स्त्रियें स्तनोंके ऊपर मनोहर चोली (अंगिया) कसके; अपने केशोंके बीच २ में पुष्प गूंथकर उनसे मानो शिशिर ऋतुको सुशोभित करती हैं ॥ ८ ॥

पयोधरैः कुङ्कुमरागपिञ्जरैः
सुखोपसेव्यैर्नवयौवनोष्मभिः।
विलासिनीभिः परीपीडितोरसः
स्वपन्ति शीतं परिभूय कामिनः ॥ ९ ॥

सं०टी०—पयोधरैरिति ॥ विलासिनीभिः कुंकुमस्य केसरस्य रागेण पिञ्जरैः पीतवर्णैः। सुखेनोपसेव्या उपभोग्यास्तैस्तथोक्तैः। नवो नूतनो यौवनस्य तारुण्यस्योष्मौष्म्यं येषु तैस्तथोक्तैः पयोधरैः कुचैः परिपीडितमुरो हृदयं येषां ते तथोक्ताः कामिनो विलासिनः शीतं हिमं परिभूयाभिभूय स्वपन्ति निद्रां कुर्वन्तीत्यर्थः॥९॥

अर्थ—कुंकुमका रंग लगनेसे पिंगल हुए विलासवती स्त्रियोंके सुखसे भोगनेके योग्य, तथा नवीन यौवनके उत्सवरूप स्तनोंके द्वारा जिनका हृदय पीडित हो रहा है ऐसे कामिजन शीतकालका तिरस्कार करके शयन करते हैं अर्थात् स्त्रियोंको कण्ठसे लगाकर शयन करनेवाले कामियोंको शीतका भान नहीं होता ॥ ९ ॥

सुगन्धिनिश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधकम्।

निशासु हृष्टाः सह कामिभिः स्त्रियः
पिबन्ति मद्यं मदनीयमुत्तमम् ॥ १० ॥

सं०टी०—सुगन्धीति ॥ हृष्टा हर्षिताः स्त्रियो युवत्यः सुगन्धिना सुरभिणा निश्वासेन विकम्पितमुत्कम्पितमुत्पलं कुवलयं यस्मिंस्तत्तथोक्तं मनोहरं सुन्दरं काममत्यन्तं रतेः सुरतस्य प्रबोधकं प्रबोधजनकं मदनीयमुन्मादकरमुत्तममुत्तमजातीयं मद्यं मधु निशासु रात्रिषु कामिभिः प्रियैः सह पिबन्तीत्यर्थः ॥ १० ॥

अर्थ—जिसकी सुगन्धिके द्वारा श्वासोंसे कमलोंको कम्पित करते हैं, कामकेलिका उद्दीपन करनेवाला अत एव मनोहर और (पान करनेवाले व्यक्तियोंको) उन्मत्त करनेवाला तथा सर्वोत्तम ऐसे मद्यको स्त्रियें रात्रीके समय प्रसन्न होकर पान करती हैं ॥ १० ॥

अपगतमदरागा योषिदेका प्रभाते
कृतनिबिडकुचाग्रा पत्युरालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं
व्रजति शयनवासाद्वासमन्यद्धसन्ती ॥११॥

सं०टी०—अपगतेति ॥ अपगतो मदरागो यस्याः सा तथोक्ता। पत्युः प्रियस्यालिङ्गनेन परिरम्भणेन कृतं निबिडं सान्द्रं कुचाग्रं स्तनाग्रं यस्याः सा तथोक्ता । प्रियतमेन कान्तेन परिभुक्तं स्वं देहं निजं शरीरं वीक्षमाणा पश्यन्ती हसन्ती स्मेराननैका योषित् स्त्री प्रभाते प्रातःकाले शयनवासादन्यद्वासं मन्दिरं व्रजतीत्यर्थः । मालिनीवृत्तमेतत् । लक्षणं तूक्तम् ॥ ११ ॥

अर्थ—पतिका आलिंगन करनेसे जिसके कुचाओंका अग्रभाग मसल गया है अत एव जिसके मदका राग दूर हो गया है ऐसी कोई स्त्री प्रातःकालके समय अपने देहको प्यारे पतिके द्वारा भली प्रकार भोगा हुआ देख हँसती २ शयन करनेके स्थानसे अन्य स्थानको जाती है ॥ ११ ॥

अगुरुसुरभिधूपामोदितं केशपाशं
गलितकुसुममालं तन्वती कुञ्चिताग्रम् ।
त्यजति गुरुनितम्बा निम्नमध्यावसाना
उषसि शयनमन्या कामिनी चारुशोभा ॥१२॥

सं०टी०—अगुर्विति ॥ अगुरोः सुरभिणा सुगन्धिना धूपेनामोदितः संजातसौरभस्तं तथोक्तम् । गलिता स्रस्ता कुसुममाला यस्य तं तथोक्तम् । कुञ्चिताग्रं कुञ्चिता वक्रभावापन्ना अग्रा अग्रभागा यस्य तादृशं केशपाशं केशसमूहं तन्वती । गुरुनितम्बा गुरू नितम्बौ यस्याः सा तथोक्ता । निम्नं कृशं मध्यावसानं मध्यप्रान्तो यस्याः सा तथोक्ता । चारुशोभा सुन्दरशोभान्या कामिनी स्त्र्युषसि प्रातःकाले शयनं पर्यङ्कम् । "शयनं मञ्चपर्यङ्कपल्यङ्काः" इत्यमरः । त्यजति मुञ्चतीत्यर्थः । क्वचित्पुस्तके " निम्नमध्यावसन्ना " इति पाठः । तदर्थस्तु निम्नेन मध्येनावसन्ना खिन्नेति निम्नमध्यावसन्ना । " उषसि " इत्यत्र विवक्षाप्राप्तोत्पन्नसंहिता । तदुक्तम्—"संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ " इति ॥ १२ ॥

अर्थ—अगरकी सुगन्धिसे और धूपसे सुवासित हुए, एवं जिनमेंसे पुष्पोंकी माला खिसक गई है ऐसे घूंघरवाले बालोंको धारण करनेवाली तथा जिनके नितंब (कटितट) भारी हैं, गहरी नाभी और पतली कमरवाली कामदेवकी शोभाको धारण करनेवाली स्त्रियें प्रातःसमय शयनागारको त्यागती हैं ॥ १२ ॥

कनककमलकान्तैः सद्य एवाम्बुधौतैः
श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः ।
उषसि वदनबिम्बैरंससंसक्तकेशैः
श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य ॥१३॥

सं०टी०—कनकेति ॥ सद्य एव तत्कालमेवाम्बुधौतैरम्बुना जलेन धौतानि प्रक्षालितानि तैरत एव कनककमलकान्तैः कनकस्य सुवर्णस्य कमलमम्बुजमिव कान्तैः सुन्दरैर्वदनबिम्बैः । " चारुताम्राधरोष्ठैः" इति पाठे तु चारवः सुन्दराश्च ते ताम्रा आरक्ताश्च तेऽधरोष्ठाश्च तैः । श्रवणतटे कर्णप्रान्ते निषक्तैर्निषण्णैः । पाटलः पाटलवर्ण उपान्तः प्रान्तो येषां तादृशानि च तानि नेत्राणि लोचनानि तैः । "लोचनं नयनं नेत्रम् " इत्यमरः । अंसे स्कन्धे संसक्ताः संलग्ना ये केशाः कुन्तलास्तैश्चोपलक्षिता योषितः स्त्रियोऽद्येदानीमुषसि प्रातःकाले गृहमध्ये श्रिय इव लक्ष्म्य इव संस्थिता इत्यर्थः ॥ १३ ॥

अर्थ—उसी समय जलसे धोये हुए, कनक (सुवर्ण) के कमलोंकी समान मनोहर मुखारविन्दोंसे, तथा कानके निकटपर्यन्त विस्तृत और लाल २ कोयोंवाले नेत्रोंद्वारा एवं कन्धोंके ऊपर लम्बायमान केशोंकरके स्त्रियें ऐसी प्रतीत होती हैं जैसे घरके बीचमें साक्षात् लक्ष्मी विराजमान हो रही हैं ॥ १३ ॥

पृथुजघनभरार्ताः किंचिदानम्रमध्याः
स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः ।
सुरतसमयवेषो नैशमाशु प्रहाय
दधति दिवसयोग्यं वेषमन्यास्तरुण्यः॥१४॥

सं०टी०—पृथ्विति ॥ पृथोः स्थूलस्य जघनस्य कट्यग्रभागस्य भरेणार्ताः पीडिताः । " क्लीबे तु जघनं पुरः " इत्यमरः । किंचिदीषदानम्रं नतं मध्यं यासां तास्तथोक्ताः । स्तनानां कुचानां भरेण भारेण यः परिखेदः श्रमस्तस्मान्मन्दमन्दं मन्थरं व्रजन्त्यो गच्छन्त्योऽन्यास्तरुण्यः कामिन्यो निशि भवं नैशं सुरतसमये संभोगकाले यो वेष आकारस्तमाशु झटिति प्रहाय त्यक्त्वा दिवसयोग्यं वेषं दधतीत्यर्थः ॥ १४ ॥

अर्थ—परिपुष्ट जंघाओंके भारसे अलसाती हुई, कमर पतली

होनेसे कुछेक झुकी हुई, स्तनोंके भारसे खेदित अत एव शनैः २ चलनेवाली ये स्त्रियें रात्रीमें बनाये हुए रतिक्रीडाके शयनवेषको त्यागकर दिनके अनुकूल अपना वेष बनाती हैं ॥ १४ ॥

नखपदचितभागान्वीक्षमाणाः स्तनाग्रा-
नधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।
अभिमतरसमेतं नन्दयन्त्यस्तरुण्यः
सवितुरुदयकाले भूषयन्त्याननानि ॥ १५ ॥

सं०टी०–नखपदेति ॥ नखपदैर्नखक्षतैश्चिता व्याप्ता भागा येषां तांस्तथोक्तान्स्तनाग्रान्कुचाग्रान्वीक्षमाणा आलोकयन्त्यः । दन्तभिन्नं रदनखण्डितमधरः किसलयमिव पल्लवमिवेति तस्याग्रं स्पृशन्त्यः स्पर्शं कुर्वन्त्य एतमभितो मनोभिलषितो यो रसस्तं नन्दयन्त्योऽभिनन्दयन्त्यस्तरुण्यो विलासवत्यः सवितुः सूर्यस्योदयकाले प्रभात आननानि मुखानि भूषयन्त्यलंकुर्वन्तीत्यर्थः ॥ १५ ॥

अर्थ–विलासिनी स्त्रियें अपने २ स्तनोंको नाखूनोंसे क्षत हुए देखती, और स्वामीके दातोंसे भिन्न हुए पल्लवकी समान कोमल ओष्ठोंको स्पर्श करती हुई तथा मनोनुकूल रतिके वेषसे प्रसन्न होती हुई सूर्योदयके समय अपने मुखको विभूषित करती हैं॥१५॥

प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः
प्रबलसुरतकेलिर्जातिकंदर्पदर्पः
प्रियजनरहितानां चित्तसंतापहेतुः
शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम् १६

सं०टी०–प्रचुरेति ॥ प्रचुरो बहुलो गुडविकारः खण्डशर्करादिर्यस्मिंस्तथोक्तो जातः । स्वादवो ये शालयो धान्यानीक्षव इक्षुदण्डाश्च तै रम्यो रमणीयः । प्रबला अत्यधिकाः सुरतकेलयो यत्र तथाविधः । जातः संजातः कंदर्पदर्पो मन्मथाधिक्यं यस्मिन्स तथो-

क्तः । प्रियजनेन कान्तजनेन रहितानाम् । विरहिणीनामित्यर्थः । चित्तसंतापस्य हेतुः कारणमेष शिशिरसमयः शीतकालो वो युष्माकं श्रेयसे कल्याणाय नित्यं सदास्त्वित्यर्थः ॥ १६ ॥

इति श्रीभारद्वाजगोत्रोत्पन्नमणिरामविरचितया चन्द्रिकाख्यया व्याख्यया समेतः कविश्रीकालिदासकविवराग्रणीकृतावृतुसंहारे महाकाव्ये शिशिरवर्णनं नाम पञ्चमः सर्गः ।

अर्थ–जिस ऋतुमें गुडके अनेक विकार (मिठाइयें) होते हैं, स्वादिष्ठ धान और गन्ने सुन्दर लगते हैं, प्रबल रतिके विहारसे कामदेवके दर्पका उद्दीपन करनेवाला, और अपने प्यारे स्वामियोंके वियोगसे दुःखी हुई स्त्रियोंके चित्तको संताप देनेवाला ऐसा यह शिशिर ऋतुका समय आपका नित्य कल्याण विधान करे ॥१६॥

इति श्रीव्रजरत्नभट्टाचार्य्यकृतौ कामिनीसमाख्यायां भाषाव्याख्यायां शिशिरवर्णनं नाम पंचमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ।

प्रफुल्लचूताङ्कुरतीक्ष्णसायको
द्विरेफमालाविलसद्धनुर्गुणः ।
मनांसिवेद्धुं सुरतप्रसङ्गिनां
वसन्तयोद्धा समुपागतः प्रिये ॥ १ ॥

सं०टी०–अथ क्रमप्राप्तं वसन्तकालं वर्णयति–प्रफुल्लेति ॥ हे प्रिये, प्रफुल्लस्य चूतस्याम्रवृक्षस्यांकुरा एव तीक्ष्णा निशिताः सायका बाणा यस्य स तथोक्तः । द्विरेफाणां भ्रमराणां माला पंक्तिरेव विलसन्धनुर्गुणो यस्य स तथोक्तो वसन्तयोद्धा सुरतप्रसङ्गिनां मनांसि वेद्धुं विदारयितुं समुपागत आगत इत्यर्थः । वंशस्थवृत्तमेतत् । लक्षणं तूक्तम् ॥ १ ॥

अर्थ-प्यारी ! यह वसन्तसमयरूप योद्धा फूले हुए आमके मौलका तीक्ष्ण बाण धारण कर और भ्रमरावलिरूप शोभायमान धनुषके रोदेको चढाके कामी पुरुषोंका मन मेदन करनेको आया है ॥ १ ॥

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते ॥ २ ॥

सं०टी०-द्रुमा इति ॥ हे प्रिये, वसन्ते वसन्तकाले सर्वं चारुतरमतिरमणीयमस्ति । सर्वं किं तदाह-द्रुमा इति । द्रुमा वृक्षाः सपुष्पाः कुसुमसहिताः । सलिलं जलं सपद्मं कमलसहितम् । स्त्रियो वनिताः सकामाः समन्मथाः । पवनो वायुः सुगन्धिः कुसुमसंसर्गात्सुरभिः । प्रदोषाः संध्यासमयाः सुखाः सुखकराः । दिवसाश्च रम्या रमणीया इति । उपजातिवृत्तमेतत् । लक्षणं तूक्तम् ॥२॥

अर्थ-प्रिये ! वसन्त ऋतुमें फूले हुए वृक्ष, कमलोंसहित जल, कामकेलिकी अभिलाषावाली स्त्रियें, महकती हुई पवन, सुखदाई संध्याकाल और मनोहर दिवस, यह सबही सुहावने लगने लगते हैं २

ईषत्तुषारैः कृतशीतहर्म्यः
सुवासितं चारुशिरः सचम्पकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले
स्तनं सहारं कुसुमैर्मनोहरैः ॥ ३ ॥

अर्थ-वसन्तऋतुके सुन्दर समयमें स्त्रियें हिम (पाले) की नन्नी बिन्दुओंसे महलोंको शीतल करती हैं, अपने सिरको चंपाके पुष्पोंसे सुगन्धित करती और मनोहर फूलोंके हारसे स्तनोंको विभूषित करती हैं ॥ ३ ॥

वापीजलानां मणिमेखलानां
शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमान्वितानां
ददाति सौभाग्यमयं वसन्तः ॥ ४ ॥

सं०टी०—वापीति ॥ अयं वसन्तो वसन्तकालो वापीजलानां दीर्घिकाजलानाम् । तत्र जलक्रीडावशात् । मणिमेखलानां मणिखचितमेखलानाम् । स्त्रीभिः कटिप्रदेशे धारणात् । शशाङ्कभासां चन्द्रकान्तीनाम् । रात्रौ संसेव्यत्वात् । प्रमदाजनानां वनिताजनानाम् । सुप्तभोगात् । कुसुमैः पुष्पैरन्विता युक्तास्तेषां तथोक्तानां चूतद्रुमाणामाम्रवृक्षाणाम् । स्त्रीकर्णावतंसविषयपल्लवत्वात् । सौभाग्यं सुभगतां ददातीत्यर्थः ॥ ४ ॥

अर्थ—यह वसन्त ऋतु वापियों (बावडियों) के जल, मणिनिर्मित मेखला (तगडी), चन्द्रमाकी प्रभाके तुल्य गोरी स्त्रियें और बौरके भारसे नम्र हुए आम्रके वृक्षोंको सौभाग्यमय करती है ४

कुसुम्भरागारुणितैर्दुकूलै-
र्नितम्बबिम्बानि विलासिनीनाम् ।
रक्तांशुकैः कुङ्कुमरागगौरैः
रलंक्रियन्ते स्तनमण्डलानि ॥ ५ ॥

सं०टी०—कुसुम्भेति ॥ कुसुम्भस्य रागेणारुणितानि रक्तानि तैस्तथोक्तैर्दुकूलैर्वस्त्रैर्विलासिनीनां विलासवतीनां नितम्बबिम्बानि । कुङ्कुमस्य केसरस्य रागेण गौराः पिञ्जरास्तैस्तथोक्तै रक्तांशुकै रक्तवस्त्रैः स्तनमण्डलानि कुचमण्डलान्यलंक्रियन्त इत्यर्थः ॥ ५ ॥

अर्थ—कामिनियें अपने गोलमटोल नितम्बोंको कसूम्बी लाल रंगसे रंगे हुए वस्त्रोंसे और कुंकुमके रंगसे गोरे झीने वस्त्रोंसे गोल गोल स्तनोंको सुशोभित करती हैं ॥ ५ ॥

कर्णेषु योग्यं नवकर्णिकारं
चलेषु नीलेष्वलकेष्वशोकम् ।
पुष्पं च फुल्लं नवमल्लिकायाः
प्रयाति कान्तिं प्रमदाजनानाम् ॥ ६ ॥

सं०टी०–कर्णेष्विति ॥ प्रमदाजनानां वनिताजनानां कर्णेषु श्रवणेषु योग्यमवतंसयोग्यं नवं नूतनं कर्णिकारं कर्णिकारकुसुमम् । "अथ द्रुमोत्पलः । कर्णिकारः परिव्याधः" इत्यमरः । चलेषु चञ्चलेषु नीलेषु कृष्णवर्णेष्वलकेष्वशोकं वञ्जुलकुसुमम् । "वञ्जुलोऽशोके" इत्यमरः । फुल्लं संफुल्लं नवमल्लिकायाः पुष्पं च । जात्यभिप्रायेणैकवचनम् । कान्तिं शोभां प्रयाति प्राप्नोतीत्यर्थः ॥ ६ ॥

अर्थ–स्त्रियोंके कानमें नवीन कर्णिकार (पुष्पविशेष), पयोधरोंके बीचमें हार और अलकोंमें अशोकके पुष्प और वेणीमें चमेलीके फूलोंकी माला शोभाको प्राप्त होती है ॥ ६ ॥

स्तनेषु हाराः सितचन्दनार्द्रा
भुजेषु सङ्गं वलयाङ्गदानि ।
प्रयान्त्यनङ्गातुरमानसानां
नितम्बिनीनां जघनेषु काञ्च्यः ॥ ७ ॥

सं०टी०–स्तनेष्विति ॥ अनङ्गेन मन्मथेनातुरं पीडितं मानसं यासां तासां तथोक्तानां नितम्बिनीनां नितम्बवतीनां स्तनेषु कुचेषु सितचन्दनेन धवलचन्दनद्रवेणार्द्रा हारा मुक्ताहाराः भुजेषु बाहुषु वलयाङ्गदानि कटककेयूराणि । जघनेषु काञ्च्यः सङ्गं संबन्धं प्रयान्ति प्राप्नुवन्तीत्यर्थः ॥ ७ ॥

अर्थ–पुष्ट नितम्बवाली स्त्रियोंके पयोधरोंमें निवेशित किये श्वेत चन्दनसे गीले हार, भुजाओंमें शंखके बाजू और वलय (कंगन) और जंघाओंके ऊपर लटकी हुई तगडियें ये सब सचमुचही कामके सुखमें साधन होते हैं ॥ ७ ॥

सपत्रलेखेषु विलासिनीनां
वक्त्रेषु हेमाम्बुरुहोपमेषु ।
रत्नान्तरे मौक्तिकसङ्गरम्यः
खेदागमो विस्तरतामुपैति ॥ ८ ॥

सं०टी०—सपत्रेति ॥ रत्नान्तरे रत्नानां मध्ये मौक्तिकानां मुक्ताफलानां सङ्गेनैव रम्यो रमणीयः स्वेदागमो घर्मनिर्गमो विलासिनीनां विलासवतीनां स्त्रीणां सपत्रलेखेषु पत्रलेखा कपोलादौ कस्तूर्यादिरचितावली तया सहितेषु हेमाम्बुरुहेण काञ्चनपद्मेनोपमेषु वक्त्रेषु मुखेषु विस्तरतां विस्तारभावमुपैति प्राप्नोतीत्यर्थः ॥ ८ ॥

अर्थ—पत्रलेखा (पत्ररचनाकी चित्रकारी) से सुशोभित हुए स्त्रियोंके सुवर्णनिर्मित कमलोंकी सदृश सुहावने मुखके ऊपर और दोनों स्तनोंके बीचमें मोतियोंकी मालाओंके समुदायसे उत्पन्न हुए प्रस्वेद (पसीना) विस्तारको प्राप्त होता है ॥ ८ ॥

उच्छ्वासयन्त्यः श्लथबन्धनानि
गात्राणि कंदर्पसमाकुलानि ।
समीपवर्तिष्वधुना प्रियेषु
समुत्सुका एव भवन्ति नार्यः ॥ ९ ॥

सं०टी०—उच्छ्वासयन्त्य इति ॥ श्लथानि शिथिलानि बन्धनानि कञ्चुक्यादीनां येषु तानि तथोक्तानि कंदर्पेणानङ्गेन समाकुलानि व्याकुलानि । "कंदर्पो दर्पकोऽनङ्गः" इत्यमरः । गात्राणि शरीराण्युच्छ्वासयन्त्यो नार्यः स्त्रियोऽधुना वसन्तकाले समीपवर्तिषु निकटस्थितेषु प्रियेषु कान्तेषु समुत्सुका उत्कण्ठिता एव भवन्ति जायन्त इत्यर्थः ॥ ९ ॥

अर्थ—जिनके बन्धन (सन्धिस्थान) शिथिल पड गये हैं ऐसे और कामदेवकी व्यथासे व्याकुल हुए अपने अंगोंको सुस्ताती

हुई स्त्रियें अपने कामियोंके समीप उपस्थित रहनेपरभी उत्कण्ठित हो जाती हैं ॥ ९ ॥

तनूनि पाण्डूनि समन्थराणि
मुहुर्मुहुर्जृम्भणतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य
करोति लावण्यससंभ्रमाणि ॥ १० ॥

सं०टी०–तनूनीति ॥ अनङ्गः कामः प्रमदाजनस्य स्त्रीजनस्याङ्गानि गात्राणि तनूनि कृशानि पाण्डूनि पाण्डुवर्णानि समन्थराणि जडीभूतानि मुहुर्मुहुर्वारंवारं जृम्भणतत्पराणि जृम्भणे प्रसितानि । "तत्परे प्रसितासक्तौ" इत्यमरः । लावण्येन सौन्दर्येण ससंभ्रमाणि संवेगसहितानि । " समौ संवेगसंभ्रमौ" इत्यमरः । करोतीत्यर्थः ॥ १० ॥

अर्थ–कामदेव अबलाजनोंके शरीरको कृश, श्वेत, मदसे अलसाये हुए, अत एव वारंवार जँभाई लेते हुए और लावण्यरूप रसके प्रति उत्कण्ठित करता है ॥ १० ॥

नेत्रेषु लोलो मदिरालसेषु
गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु निम्नो जघनेषु पीनः
स्त्रीणामनङ्गो बहुधा स्थितोऽद्य ॥ ११ ॥

सं०टी०–नेत्रेष्विति ॥ स्त्रीणां युवतीनां मदिरयालसान्यालस्ययुक्तानि तेषु तथोक्तेषु नेत्रेषु लोचनेषु । "लोचनं नयनम् " इत्यमरः । लोलश्चञ्चलः । गण्डेषु कपोलेषु पाण्डुः पाण्डुवर्णः । स्तनेषु कुचेषु कठिनः । मध्येषु मध्यभागेषु निम्नो गभीरः । जघनेषु पीनः पुष्ट इत्यनेन प्रकारेणानङ्गः कामोऽद्य बहुधा बहुप्रकारेण स्थित उपस्थित इत्यर्थः ॥ ११ ॥

अर्थ–स्त्रियोंके मदिरा पीनेसे अलसाये हुए नेत्रोंमें स्थिरभाव, गण्डस्थलोंमें श्वेत रंग, स्तनोंमें कठोरता, कमरमें लचकना और जंघाओंमें पुष्टता इत्यादि विविध रूपोंसे आजकल कामदेव स्थित हो रहा है ॥ ११ ॥

अङ्गानि निद्रालसविभ्रमाणि
वाक्यानि किंचिन्मदलालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि
चकार कामः प्रमदाजनानाम् ॥ १२ ॥

सं०टी०–अङ्गानीति ॥ कामः प्रमदाजनानां कामिनीनामङ्गानि शरीराणि निद्रयालसा विभ्रमा शृङ्गारवेषा येषु तानि तथोक्तानि । वाक्यानि किंचिदीषन्मदेन लालसानि चाटूनि। वीक्षितानि प्रेक्षणानि भ्रूक्षेपेण जिह्मानि कुटिलानि च चकार कृतवानित्यर्थः ॥ १२ ॥

अर्थ–कामदेवने स्त्रियोंके अंगको निद्राके आलस्यसे विह्वल (सुस्त), वचनोंको कुछेक मदिरापानसे अलसाये हुए और चितवनको भ्रुकुटीकी वक्रतासे तिर्च्छा कर दिया ॥ १२ ॥

प्रियङ्गुकालीयककुङ्कुमाक्तं
स्तनेषु गौरेषु विलासिनीभिः ।
आलिप्यते चन्दनमङ्गनाभि-
र्मदालसाभिर्मृगनाभियुक्तम् ॥ १३ ॥

सं०टी०–प्रियङ्गुरिति ॥ विलासिनीभिर्विलासवतीभिर्मदेनालसा आलस्ययुक्तास्ताभिस्तथोक्ताभिरङ्गनाभिः स्त्रीभिर्गौरेषु गौरवर्णेषु स्तनेषु कुचेषु प्रियङ्गुः श्यामा लता, कालीयकं जायकम्, कुङ्कुमं केसरं च तैराक्तं युक्तं मृगनाभियुक्तं कस्तूरीयुक्तं चन्दनमालिप्यते लाप्यत इत्यर्थः ॥ १३ ॥

अर्थ–मदकी अधिकतासे अलसाती हुई स्त्रियें पयोधरोंके अं-

गरागमें अगर केसर और श्याम कुंकुम डालकर कस्तूरी मिला हुआ चन्दन लगाती हैं ॥ १३ ॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदालसाङ्गः ॥ १४ ॥

सं०टी०—गुरूणीति ॥ काममदेनालसमङ्गं यस्य स तथोक्तो जनो गुरूणि वासांसि वस्त्राणि तूर्णं सत्वरं विहाय त्यक्त्वा तनूनि सूक्ष्माणि लाक्षारसेन रञ्जितान्यारक्तानि सुगन्धिना सुरभिणा कालागुरुणा कृष्णागुरुणा धूपितानि संजातधूपानि वासांसि धत्ते दधातीत्यर्थः ॥ १४ ॥

अर्थ—कामी पुरुष कामके बाणप्रहारसे व्यथित हो बोझीले वस्त्रोंको जल्दी २ त्यागकर, लाखके रंगसे रंगे हुए, सुगन्धि और अगरसे सुवासित किये हुए झीने वस्त्र धारण करते हैं ॥ १४ ॥

पुंस्कोकिलश्चूतरसासवेन
मत्तः प्रियां चुम्बति रागदृप्तः ।
कूजद्विरेफोऽप्ययमम्बुजस्थः
प्रियं प्रियायाः प्रकरोति चाटु ॥ १५ ॥

सं०टी०—पुंस्कोकिलेति ॥ रागेण हृष्टो हर्षितश्चूतस्याम्रवृक्षस्य रस एवासवस्तेन मत्तः प्रमत्तः पुंस्कोकिलः प्रियां चुम्बति । अम्बुजे कमले तिष्ठति स तथोक्तः कूजन्गुञ्जन्नयं द्विरेफो भ्रमरोऽपि प्रियाया भ्रमर्याः प्रियमिष्टं चाटु प्रकरोतीत्यर्थः ॥ १५ ॥

अर्थ—यह कोयलका नर आमके रससे उन्मत्त हो बडे आदरभावसे अपनी प्यारीके मुखका चुम्बन कर रहा है, कमलमें स्थित हुआ अत एव अव्यक्तशब्द करनेवाला भ्रमर शीघ्रही अपनी प्यारीका हित करता है ॥ १५ ॥

ताम्रप्रवालस्तबकावनम्रा-
श्चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः
पर्युत्सुकं मानसमङ्गनानाम् ॥ १६ ॥

सं०टी०—ताम्रेति ॥ ताम्राणामारक्तानां प्रवालानां पल्लवानां स्तबकैर्गुच्छैरवनम्रा नताः पुष्पिताः संजातपुष्पा अत एव चारवः सुन्दराः शाखा येषां ते तथोक्ताः । पवनेन वायुनावधूताः कम्पिताश्चूतद्रुमा आम्रवृक्षा अङ्गनानां वनितानां मानसमन्तःकरणं कामम त्यन्तं पर्युत्सुकमुत्काण्ठितं कुर्वन्तीत्यर्थः ॥ १६ ॥

अर्थ—हे मनोहरि! लाल वर्णके वौरके गुच्छोंसे नीचेको झुके हुए फुली हुई सुन्दर शाखाओंवाले यह आम्रके वृक्ष पवनके लगनेसे कंपित होकर स्त्रियोंके मनको उत्कण्ठित करते हैं ॥ १६ ॥

आमूलतो विद्रुमरागताम्रं
सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥ १७ ॥

सं०टी०—आमूलेति ॥ आ मूलतो मूलादारभ्य विद्रुमस्य प्रवालस्य रागवत्ताम्रमारक्तं पुष्पचयं कुसुमसमूहं दधाना धारयन्तः सपल्लवाः पत्रसहिता अशोका वञ्जुलद्रुमा निरीक्ष्यमाणा अवलोक्यमानाः सन्तो नवयौवनानां विप्रयुक्तानां तरुणीनां च हृदयं सशोकं कुर्वन्तीत्यर्थः ॥ १७ ॥

अर्थ—(ऊपरसे लेकर) मूलपर्यंत मूंगोंके रंगकी समान लाल २ पत्र और पुष्पोंके गुच्छोंको धारण करनेवाले ऐसे अशोकवृक्ष देखे जानेसे नवीन स्त्रियोंके हृदयको शोकसंयुक्त कर देते हैं ॥ १७ ॥

मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
चूताभिरामकलिकाः समवेक्ष्यमाणः ॥१८॥

सं०टी०–मत्तेति ॥ मत्तैरुन्मत्तैर्द्विरेफैर्भ्रमरैः परिचुम्बितानि चारूणि सुन्दराणि पुष्पाणि यासां तास्तथोक्ताः । मन्दैरनतिप्रबलैरनिलैः पवनैराकुलिता आन्दोलिता नम्रा नम्रीभूता मृदवः कोमलाश्च प्रवाला नवकिसलया यासां तास्तथोक्ताः । चूतस्याम्रस्याभिरामाः सुन्दराः कलिकाः समवेक्ष्यमाणा अवलोक्यमानाः सत्यः कामिमनसां सहसाकस्मादुत्सुकत्वमौत्सुक्यं कुर्वन्तीत्यर्थः॥ वसन्ततिलकावृत्तमेतत् । लक्षणं तूक्तम् ॥ १८ ॥

अर्थ–जिनकी मनोहर आकृतिको मदमाते भौंरोंने चुम्बन किया है, मन्द २ पवनके लगनेसे जिनकी कलियें चलायमान हैं, ऐसी छोटी २ वेलियें देखे जानेपर कामी पुरुषोंके मनमें शीघ्रही उत्कण्ठा उत्पन्न कर देती हैं ॥ १८ ॥

कान्तामुखद्युतिजुषामपि चोद्गतानां
शोभां परां कुरबकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य
कंदर्पबाणपतनव्यथितं हि चेतः ॥ १९॥

सं०टी०–कान्तेति ॥ हे प्रिये ! कान्तामुखस्य रमणीवदनस्य द्युतिं कान्तिं जुषन्ते सेवन्ते इति तेषां तथोक्तानाम् । अपि च किं चोद्गतानां निर्गतानाम् । कुर बकद्रुमा अम्लानवृक्षास्तेषां मञ्जरीणाम् । " अम्लानस्तु महासहा । तत्र शोणे कुरबकः" इत्यमरः । परामुत्कृष्टां शोभां दृष्ट्वावलोक्य कस्य सहृदयस्य चेतोऽन्तःकरणं कंदर्पस्य कामस्य बाणानां शराणां पतनेन निपातेन व्यथितं पीडितं न भवेत् । अपि तु सर्वस्यापीत्यर्थः । हि पादपूरणार्थः१९॥

अर्थ-(बताओ) प्यारी ! मनोहर स्त्रियोंके मुखकी कान्ति चुरानेवाली, नवीन चटकी हुई, कुरबककी मञ्जरीकी अतीव शोभाको देखकर किस पथिकका चित्त कामबाणोंके संघातसे व्यथित न होगा ? ॥ १९ ॥

आदीप्तवह्निसदृशैर्मरुतावधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्यो वसन्तसमये हि समाचितेयं
रक्तांशुका नववधूरिव भाति भूमिः ॥ २० ॥

सं०टी०-आदीप्तेति ॥ वसन्तसमये वसन्तकाले सर्वत्रेतस्ततः सद्यः सत्वरमादीप्तेनाभिमुख्येन प्रज्वलितेन वह्निना सदृशास्तैस्तथोक्तैः । आरक्तैरित्यर्थः । मरुता पवनेनावधूताः कम्पितास्तैस्तथोक्तैः कुसुमैः पुष्पैरवनम्रा नतास्तैस्तथोक्तैः किंशुकवनैः पलाशवृक्षसमुदायैः । " पलाशे किंशुकः पर्णो वातपोथः " इत्यमरः । समाचितेयं भूमिः पृथिवी रक्तांशुका रक्तवसना नववधूरिव नूतनस्त्रीव भाति शोभत इत्यर्थः । हि निश्चयम् ॥ २० ॥

अर्थ-वसन्त ऋतु प्राप्त हो जानेपरभी दहकती हुई अग्निकी समान चमकीले, पवनसे कंपित करे हुए और पुष्पोंके भारसे नम्र हुए टेसूके वृक्षोंसे यह भूमि चारों ओरसे लाल वस्त्र धारण करनेवाली नवोढा वधूकी समान सुहाती है ॥ २० ॥

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न कृतं नु दग्धम् ।
यत्कोकिलः पुनरयं मधुरैर्वचोभि-
र्यूनां मनः सुवदनानिहितं निहन्ति ॥ २१ ॥

सं०टी०-किं किंशुकैरिति ॥ सुवदनायां रमणीयमुखायां निहितं स्थापितं यूनां तरुणानां मनोऽन्तःकरणं शुकस्य कीरस्य मुखस्य वदनस्य छविरिव छविः कान्तिर्येषां तैस्तथोक्तैः किंशुकैः पलाशकु-

सुमैः किं न भिन्नं न विदारितम् । कर्णिकारस्य द्रुमोत्पलस्य कुसुमैः पुष्पैश्च । नु निश्चयम् । किं दग्धं न कृतम् । यत्पुनरयं कोकिलो मधुरैर्वचोभिर्वचनैर्निहन्तीत्यर्थः ॥ २१ ॥

अर्थ—सुएके मुखकी समान लाल छविवाले टेसुओंने भला क्या भस्म नहीं किया ? भला मनोहर कनेरके पुष्पोंने क्या २ नहीं ठगा ? जो फिरभी ये कोकिलाएं मनोहर वचनोंसे युवा व्यक्तियोंके मनको दुखा २ के हरती हैं ॥ २१ ॥

पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥ २२ ॥

सं०टी०—पुंस्कोकिलैरिति ॥ कलमव्यक्तमधुरं वचो वचनं येषां तैस्तथोक्तैः । उपात्तः संप्राप्तो हर्षो येषां तैस्तथोक्तैः पुंस्कोकिलैः। उन्मदेनोत्कटमदेन कलान्यव्यक्तमधुराणि वचांसि वचनानि कूजद्भिर्भृङ्गैर्भ्रमरैः । लज्जया त्रपयान्वितं युक्तं सविनयं विनयसहितं वधूनां स्त्रीणां हृदयं कुलगृहेऽपि क्षणेन क्षणमात्रेण पर्याकुलं व्याकुलं कृतमित्यर्थः ॥ २२ ॥

अर्थ—फलके रसोंसे हार्षित हुए और उन्मत्त करनेवाले वचनोंको धीरे २ बोलनेवाले कोकिलाओंके नरोंने एक क्षणभरहीमें कुलीन घरमें रहनेवाली वधूजनोंका लज्जासमन्वित विनयसंपन्न हृदय व्याकुल कर दिया ॥ २२ ॥

आकम्पयन्कुसुमिताः सहकारशाखा
विस्तारयन्परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन्नराणां
नीहारपातविगमात्सुभगो वसन्ते ॥ २३ ॥

सं०टी०—आकम्पयन्निति ॥ वसन्ते वसन्तकाले नीहारस्य हिमस्य यः पातः पतनं तस्य विगमान्नाशात्सुभगः सुन्दरो वायुः पवनः कुसुमिताः संजातकुसुमाः सहकारस्यातिसौरभस्याम्रवृक्षस्य शाखाः। "आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः। आकम्पयन्सन्। दिक्षु परभृतस्य कोकिलस्य। "वनप्रियः परभृतः कोकिलः पिकः" इत्यमरः। वचांसि वचनानि विस्तारयन्। नराणां पुंसां हृदयानि हरन्नपहरन्निवाति विशेषेण वहतीत्यर्थः२३

अर्थ—बौरसहित आमकी शाखाओंको कंपित करता, दिशा और विदिशाओंमें कोकिलाओंकी कूकका विस्तार करता और वधूजनोंके हृदयको हरता हुआ. एवं बरफ गिरनेसे हीन ऐसा वायु वसन्त ऋतुमें चलता है ॥ २३ ॥

कुन्दैः सविभ्रमवधूहसितावदातै-
रुद्द्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रागेव रागमलिनानि मनांसि यूनाम् ॥२४॥

सं०टी०—कुन्दैरिति ॥ सविभ्रमाणि विभ्रमसहितानि यानि वधूहसितानि रमणीहास्यानि तानीवावदातानि धवलानि तैस्तथोक्तैः। "अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः" इत्यमरः। कुन्दैः कुन्दकुसुमैरुद्द्योतितानि दीप्तानि। शोभितानीति यावत्। मनोहराण्ययुपवनान्यारामाः। निवृत्तोऽनुरागो यस्मात्तत्तथोक्तं मुनेरपि चित्तं हरन्त्यपहरन्ति। प्रागेव मुनिचित्तापहरणात्प्रागेव रागेण मलिनानि यूनां मनांसि हरन्तीत्यर्थः ॥ २४ ॥

अर्थ—संभ्रमपूर्वक स्त्रियोंके हास्यकी समान श्वेत कुन्दोंसे परिवर्धित किये हुए अत एव मनोहर बगीचे रागरहित मुनियोंके मनकोंभी मोहित करते हैं; और अन्य पुरुषोंके मन तौ प्रायः अनुरागसे स्वयंही चलायमान होते हैं ॥ २४ ॥

आलम्बिहेमरसनाः स्तनसक्तहाराः
कंदर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।
मासे मधौ मधुरकोकिलभृङ्गनादै-
र्नार्यो हरन्ति हृदयं प्रसभं नराणाम्॥ २५ ॥

सं०टी०–आलम्बीति ॥ आलम्बिन्यो लम्बमाना हेमरसनाः सुवर्णमेखला यासां तास्तथोक्ताः स्तनेषु कुचेषु सक्ताः संसक्ता हारा यासां तास्तथोक्ताः । कंदर्पस्य मन्मथस्य दर्पेणाधिक्येन शिथिलीकृता गात्रयष्ट्यः शरीरलता यासां तास्तथोक्ता नार्यः स्त्रियो मधौ मासे वसन्ते नराणां हृदयं मधुरैः कोकिलाश्च भृङ्गाश्च तेषां नादैर्विरुतैः सह प्रसभमत्यन्तं हरन्ति ॥ २५ ॥

अर्थ–सुवर्णनिर्मित तगडियें जिनके अंगमें लटक रही हैं, जिनके स्तनोंके बीचमें हार पडे हैं, वेलीकी समान जिनके छरहरे शरीर कामदेवकी अधिकतासे अलसा रहे हैं ऐसी रमणियें चैत्रमासमें कोकिला और भ्रमरोंके मधुर शब्दोंके द्वारा मनुष्योंके चित्तको चुराती हैं ॥ २५ ॥

नानामनोज्ञकुसुमद्रुमभूषितान्ता-
न्हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।
शैलेयजालपरिणद्धशिलातलौघा-
न्दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः॥२६॥

सं०टी०–नानेति ॥ सर्वो जनो लोको नाना नानाजातीया मनोज्ञाः सुन्दरा ये कुसुमद्रुमाः पुष्पवृक्षास्तैर्भूषिताः शोभिता अन्ताः प्रान्तभागा येषां तांस्तथोक्तान् । हृष्टा हर्षिता येऽन्यपुष्टाः कोकिलास्तेषां निनदैः शब्दैराकुला व्याकुलाः सानुदेशाः प्रस्थप्रदेशा येषां तांस्तथोक्तान् । " स्तुः प्रस्थः सानुरस्त्रियाम् " इत्यमरः । शैलेयजालेन परिणद्धा व्याप्ताः शिलातलानामोघाः समुदाया येषां

तांस्तथोक्तान्क्षितिभृतः पर्वतान्दृष्ट्वा मुदं हर्षमेति प्राप्नोतीत्यर्थः २६

अर्थ–जिनके अग्रभाग विविध प्रकारके मनोहर पुष्पोंके वृक्षोंसे विभूषित हैं, जिनके चौतर्फा प्रसन्न कोकिलाओंका सुन्दर निनाद व्याप्त है, जिनके शिलासमुदाय पहाडी वृक्षोंके झुण्डसे नम्र हो रहे हैं ऐसे पर्वतोंको देखकर सभी लोग प्रसन्न होते हैं ॥ २६ ॥

नेत्रे निमीलयति रोदिति याति शोकं
घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्ति-
र्दृष्ट्वाध्वगः कुसुमितान्सहकारवृक्षान् ॥ २७ ॥

सं०टी०–नेत्रे इति ॥ कान्तायाः वियोगेन विरहेण परिखेदिता खिन्ना चित्तवृत्तिर्यस्य स तथोक्तोऽध्वगः पथिकः कुसुमितान्मञ्जरीयुतान्सहकारवृक्षानाम्रवृक्षान् । " आम्रश्चूतो रसालोऽसौ सहकारोऽथिसौरभः " इत्यमरः । दृष्ट्वावलोक्य नेत्रे लोचने निमीलयति पिधत्ते । तद्दर्शनस्य संतापाधिक्यजनकत्वात् । रोदिति क्रन्दति शोकं याति । तत्समये प्रेयसीप्राप्त्यभावात् । घ्राणं करेण हस्तेन विरुणद्धि । तदीयसौगन्धस्यापि संतापाधिक्यजनकत्वात् । उच्चैरुच्चस्वरेण विरौति । हा कान्तेति शब्दं करोतीत्यर्थः ॥ २७ ॥

अर्थ–जिनके चित्त अपनी २ कान्ताओंके वियोगसे खेदित हो रहे हैं ऐसे पथिकगण फूले हुए आम्रके वृक्षोंको देखकर नेत्र मूंदते, रोदन करते, मोहित होते, नासिकाको हाथसे बन्द करते और उच्च स्वरसे चीख मारते हैं ॥ २७ ॥

समदमधुभराणां कोकिलानां च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यः ।
इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां
तुदति कुसुममासो मन्मथोद्वेजनाय॥ २८ ॥

सं०टी०-समदेति ॥ रम्यः सुन्दरः कुसुममासो वसन्तसमयः समदा मदसहिता ये मधुकरा भ्रमरास्तेषां कोकिलानां च नादैः । कुसुमिताः संजातकुसुमाः सहकारा आम्रवृक्षास्तैः कर्णिकारैर्द्रुमोत्पलैः । सुतीक्ष्णैरतिनिशितैरिषुभिर्बाणैरिव । मन्मथोद्वेजनायोद्वेजयन्मानिनीनां मानवतीनां मानसं तुदति व्यथयतीत्यर्थः । मालिनीवृत्तमेतत् । लक्षणं तृक्तम् ॥ २८ ॥

अर्थ-कुसुमबाणधारी कामदेव कामोद्दीपन करनेके तईं मदोन्मत्त भ्रमरों और कोकिलाओंके शब्दसे, फूले हुए आम और मनोहर कनेरके वृक्षोंसे मानवती योषिताओंके मनको इस प्रकार व्यथित करता है मानो तीक्ष्ण बाणोंसे पीडित करता है ॥ २८ ॥

रुचिरकनककान्तीन्मुञ्चतः पुष्पराशी-
न्मृदुपवनविधूतान्पुष्पितांश्चूतवृक्षान् ।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरनिघातैर्मोहमेति प्रवासी ॥ २९ ॥

अर्थ-मार्गमें आमके वृक्षोंको मन्द २ पवनसे कंपित हुए अत एव मनोहर सुवर्णकी समान कान्तिमान् बौरके गुच्छोंको त्यागते हुए सन्मुख देखकर दुबले पतलेभी पथिक कामबाणोंके प्रहारसे मोहको प्राप्त होते हैं ॥ २९ ॥

परभृतकलगीतैर्ह्लादिभिः सद्वचांसि
स्मितदशनमयूखान्कुन्दपुष्पप्रभाभिः ।
करकिसलयकान्तिं पल्लवैर्विद्रुमाभै-
रुपहसति वसन्तः कामिनीनामिदानीम् ॥ ३०

अर्थ-इस समय वसन्त ऋतु स्त्रियोंके सुन्दर वचनोंका कोकिलाओंके श्रवणसुखद अत एव आनन्द देनेवाले शब्दोंसे, मुसकुराते हुए दन्तकान्तिका कुन्दके पुष्पोंकी प्रभासे, और मूंगेकी

समान लाल २ नये २ पल्लवोंसे नवीन पल्लवकी समान पतले २ हाथोंकी कान्तिका हास्य करती है ॥ ३० ॥

कनककमलकान्तैराननैः पाण्डुगण्डै-
रुपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः ।
मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रा-
न्स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ॥३१॥

अर्थ–पुष्ट पयोधरोंके भारसे नीचेको झुकी हुई स्त्रियें सुवर्णके कमलोंकी समान कान्तिवाले मुखसे, श्वेत गण्डस्थलोंसे, जिनके ऊपर हार लम्बायमान हो रहे हैं ऐसे चन्दनसे गीले कुचाओं करके कामसे उत्पन्न हुए विलासों और चितवनसे शान्त चित्तवाले (ऋषिमुनियों) कोभी कामी बना देती हैं ॥ ३१ ॥

मधुसुरभिमुखाब्जं लोचने लोध्रताम्रे
नवकुरुबकपूर्णः केशपाशो मनोज्ञः ॥
गुरुतरकुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां मन्मथाय ॥३२॥

अर्थ–मद्यसे अधिवासित स्त्रियोंके कमलसे सुन्दर सुख, लोध्रकी तुल्य रक्तवर्णवाले नेत्र, नवीन कुरबकके पुष्पोंसे व्याप्त अत एव सुन्दर केशकलाप, अतिभारी पयोधर तथा नितंब ये सब क्या इस समय कामोद्दीपन करनेमें सहायक नहीं होते हैं? ॥ ३२ ॥

आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
सम्बाधितं परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ॥ ३३ ॥

अर्थ–फूले हुए आमके वृक्षमें लगनेसे सुगन्धित हुए वायुके

द्वारा; एवं मदोन्मत्त कोकिला और भ्रमरोंके श्रवणसुखद गीत-शब्दोंकरके स्त्रियोंके हृदय कंपित होते हैं ॥ ३३ ॥

रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि शीधुपानं
सर्वं रसायनमिदं कुसुमायुधस्य ॥ ३४ ॥

अर्थ-रमणीय संध्यासमय, चन्द्रमाकी निर्मल चांदनी, प्रगल्भ कोकिलाओंकी कूक, सुगन्धि सनी वायु, मदोन्मत्त भ्रमरोंकी गुंजार, और रात्रीके समय मद्यका पान करना, यह सभी कामदेवकी रसायन (उद्दीपन करनेवाली सामग्री) है ॥ ३४ ॥

छायां जनः समभिवाञ्छति पादपानां
नक्तं तथेच्छति पुनः किरणं सुधांशोः ।
हर्म्यं प्रयाति शयितुं सुखशीतलं च
कान्तां च गाढमुपगूहति शीतलत्वात्॥३५॥

अर्थ-सब लोग वृक्षोंकी छायाकी इच्छा करते हैं, तथा रात्रीमें शीतरश्मी चन्द्रमाकी किरणोंकी अभिलाषा करते हैं । शीतल अत एव सुखदाई महलोंमें शयन करने जाते और शीतल होनेके कारण स्त्रियोंको गाढ आलिंगन करते हैं ॥ ३५ ॥

मलयपवनविद्धः कोकिलेनाभिरम्यः
सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्ट्यमानः समन्ता-
द्भवतु तव वसन्तः श्रेष्ठकालः सुखाय॥३६॥

अर्थ-मलयाचलकी पवनसे समन्वित, कोकिलाओंसे सुरम्य, सुगन्धित मधुके छिडकनेसे सुगन्धिका संचार करनेवाला और

भांति २ के भ्रमरगणोंकरके चारों ओरसे आवरण किया हुआ अत एव सब ऋतुओंमें श्रेष्ठ ऐसा वसन्तसमय तुम्हारा सुखसाधन करे ॥ ३६ ॥

आम्रीमञ्जुलमञ्जरीवरशरः सत्किंशुकं यद्धनु-
र्ज्यायस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृतो यद्बन्दिनो लोकजि-
त्सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥३७॥

सं०टी०—आम्रीति ॥ यस्याम्र्याम्रसंबन्धिनी मञ्जुला सुन्दरा मञ्जरी वरशरा उत्कृष्टा बाणाः सदुत्तमं किंशुकं पलाशकुसुमं धनुः । यस्यालिकुलं भ्रमरसमूहो ज्या गुणः । यस्य कलङ्करहितं सितं श्वेतं छत्रं सितांशुश्चन्द्रः । यस्य मत्तेभो मत्तगजो मलयानिलो मलयसंबन्धी पवनः । यस्य बन्दिनो वैतालिकाः परभृतः कोकिलाः । लोकजिद्वसन्तेनान्वितो युक्तः सोऽयं वितनुरनङ्गो वो युष्मभ्यं भद्रं कल्याणं वितरीतरीतु ददात्वित्यर्थः । शार्दूलविक्रीडितं वृत्तम् । तल्लक्षणं तु वृत्तरत्नाकरे—" सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् " इति ॥ ३७ ॥

पूजितो न जगदीश्वरो मया नापि विश्वजननी सुसेविता ।
किंतु यत्प्रलपितं निजेच्छया तत्र सद्गुरुकृपैव कारणम् ॥
वेदचन्द्रवसुभूमिवत्सरे माघसूर्यसितपञ्चमीतिथौ ।
व्योमपुष्करनगैर्मिताकृतिः पूरिता हि मणिरामशर्मणा ॥

इति श्रीभारद्वाजगोत्रोत्पन्नमणिरामविरचिताया चन्द्रिकाख्यया व्याख्यया समेतः कविश्रीकालिदासकविवराग्रणीकृ॰ ऋतुसंहारे महाकाव्ये वसन्तवर्णनं नाम षष्ठः सर्गः ॥ ६ ॥

अर्थ—आमकी निर्मल मंजरी जिसके श्रेष्ठ बाण हैं, सुन्दर ढाक जिसका धनुष है, मधुकर जिसकी प्रत्यंचा है, निर्मल चन्द्रमा जिसका श्वेत छत्र है, मदवाले हाथीही जिसके मलयाचलकी पवन

है, कोकिलागण जिसके बन्दी हैं, ऐसे विश्वविजयी कामदेव वसन्त ऋतुको साथ लेकर तुम्हारे कल्याणका विस्तार करे ॥ ३७ ॥

इत्याचार्यवर्यपदवाक्यप्रमाणपारावारपारीणसनातनहिन्दू-
धर्ममहामहोपदेशकमहर्षिश्रीज्वालानाथतनूपन्नमुरा-
दाबाददेशनिवासि-व्रजरत्नभट्टाचार्यकृतकामिनी-
समाख्यभाषाव्याख्या समाप्त.

समाप्तोऽयं ग्रन्थः ।

पुस्तक मिलनेका ठिकाना—
गंगाविष्णु श्रीकृष्णदास
" लक्ष्मीवेङ्कटेश्वर " छापाखाना,
कल्याण-मुम्बई.

श्रीः

आत्मपरिचय।

सन्ति श्वान इवोद्वान्तभोजिनः किल पण्डिताः ।
स्वकीयबलवान् विद्वान् शरभः कोऽपि दुर्लभः ॥ १ ॥
सर्गादौ समजायन्त कर्मठाग्र्याश्च गुर्जराः ।
विमत्सरा वावदूकाः कवयश्च द्विजातयः ॥ २ ॥
आसीत् कुलपतिस्तत्र विद्वद्रत्नमहाशयः ॥
विद्याचुञ्चू राज्यमान्यो राधाकृष्णाभिधः कविः ॥ ३ ॥
तद्वंशे श्रीनूपजीधर्मदत्तौ ज्योतिःशास्त्रे लब्धकीर्ती किलास्ताम् ।
तारुण्ये वै कोविदो धर्मदत्तः स्वर्गं ह्यातीद्यायजूकप्रबर्हैः ॥ ४ ॥

सुतावभूतां किल धार्मिकस्य मुद् ।
वदान्यकौ चन्द्रमणिश्च प्राणमुद् (प्राणसुखः) ॥
अनूपदत्तस्य कुलप्रकाशकौ ।
सुराज्यमान्यौ कविताविलासिनौ ॥ ५ ॥

श्रीमद्भूदेववंशप्रथितगुणगणाभूषणाभूषितांगो ।
गोषट्कर्मार्चनादिष्वविरतनिरतः श्रोत्रियो भूमिरत्नम् ॥
श्रीमच्चन्द्रार्धचूडामणिपदकमलाराधनाच्छुद्धबुद्धेः ।
ज्वालानाथः कवीशो ह्यजनि जनकजाजानिपादप्रसादात् ॥ ६ ॥
तत्सूनुना व्रजरत्नभट्टाचार्येण निर्मिता ।
कामिनीत्याख्यटीकेयं विद्वन्मार्गानुसारिणा ॥ ७ ॥

विनयावनतः
व्रजरत्नभट्टाचार्य.
मोहल्ला–पटुवरगंज,
मुरादाबाद.

अन्वितार्थप्रकाशिकाख्यव्याख्यासहिता

श्रीमद्भागवतटीका.

यह टीका बूंदी महाराजाश्रित पं० गंगासहायजीने बनाई है. इसमें मल्लिनाथके ढंगपर अन्वयक्रमसेसरल और कठिन सब श्लोकोंका अर्थ सुगम रूपसे लिखा है और टीकामें जिन २ बातोंका लिखना आवश्यक है वे सब संक्षेप और सुगमतासे लिखदी हैं इसमें श्रीधरजीकी टीकाकी तो प्रायः सब बात आगई और बहुतसी बातें तोषणीसारार्थसंदर्शिनी आदिसेभी लीगई है और सुगमता अन्वयक्रम और संक्षेपपर पूरी दृष्टि रक्खी गई है इस टीकाके शेषमें भागवतोपयोगी वेदांत सांख्यादिक कितनेक मत सुगम रीतिसे लिख दिये हैं. इसमें किसी मतका पक्षपात अथवा खंडन नहीं किया गया है। सब मतोंके आचार्योंका आदरपूर्वक स्मरण किया गया है. और भागवतके स्कंध और प्रकरणोंका अभिप्राय और श्लोकोंके छन्द तथा अध्यायोंके श्लोकोंकी गणना लिखदी है औरभी बहुत बातें हैं. मूलसहित इस टीकाका पाठ सत्तर सहस्र ७०००० के लगभग है. इसका मूल्य अगाऊ रुपया भेजनेवालोंसे १२ रुपये और छपजानेपर १५रु. प्रति पुस्तक नियत हुआ है. नमूना मंगालो.

अन्वितार्थप्रकाशिकाख्यव्याख्यासहिता

दशमस्कन्ध

छपके तैय्यार है की० ४ रु०

बारहमासतरंग– इसमें भांति २ के बारहमासे ऐसी २ दिलचस्प लावनीमें लिखे गये हैं जिनके पढनेसे दिल फडक जाता है " सामनकं रुतमें झमके तो मोरा रँग क्या सुहाए " इत्यादि दिलके ऊपर मोहिनी डालनेवाली बातें कभी प्यारीके मुखसे सुनी हैं ? इस पुस्तकके पढनेसे येही चटपटी मजेदार बातें शोरे गजलें ठुमरी हरेक महीने और मौसममें गानेलायक मिलेंगे। पुस्तक कैसी मनोहर बनी है यह एक बार देखनेहीसे प्रतीत होगा। मूल्य ६ आना.

भक्तमालहरिभक्तिप्रकाशिका (वार्तिकमें) की० ४ रु.

पुस्तकें मिलनेका ठिकाना–गङ्गाविष्णु श्रीकृष्णदास,

" लक्ष्मीवेंकटेश्वर " छापखाना, कल्याण–मुंबई.

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
L.B.S. National Academy of Administration, Library
मसूरी
MUSSOORIE
यह पुस्तक निम्नाँकित तारीख तक वापिस करनी है।
This book is to be returned on the date last stamped

दिनांक Date	उधारकर्त्ता की संख्या Borrower's No.	दिनांक Date	उधारकर्त्ता की संख्या Borrower's No.

उत्तरवाराणशीमाहात्म्य ०–३
गंगाविष्णुमंडण ०–२
संस्कृतप्रदीप भाषाटीका ०–४
विष्णुकवच–स्तोत्र ०–१
टिप्पणीसह ०–८
भूलोकरहस्य. . ०–३
श्रीजगन्नाथमाहात्म्य बडा
४९ अध्याय १–४
पुस्तक मिलनेका ठिकाना–गंगाविष्णु श्रीकृष्णदास,
" लक्ष्मिवेंकटेश ... ण–मुंबई.
GL SANS 891.22
KAL

Sans
891.22
कालिदा
अवाप्ति सं० 14542
ACC. No.....
वर्ग सं.
Class No.....
पुस्तक सं.
Book No.....
लेखक
Author कालिदास
शीर्षक ऋतुसंहार : 1
Title.....
.....
निर्गम दिनाँक | उधारकर्ता की सं. | हस्ताक्षर
Signature
Sans
891.22 LIBRARY
कालिदा/ LAL BAHADUR SHASTRI
National Academy of Administration
MUSSOORIE
Accession No. 125601
1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discretion of the Librarian.
4. Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.
5. Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.
Help to keep this book fresh, clean & moving